# TWO BUDDHIST VINAYA TEXTS IN SANSKRIT

## PRĀTIMOKṢA SŪTRA AND BHIKṢUKARMAVĀKYA

*Edited by*

**PROF. ANUKUL CHANDRA BANERJEE**

HE WORLD PRESS PRIVATE LIMITED

A
BQ2270
.T85

# TWO BUDDHIST VINAYA TEXTS IN SANSKRIT

## PRĀTIMOKṢA SŪTRA AND BHIKṢUKARMAVĀKYA

PROF. ANUKUL CHANDRA BANERJEE
M.A., LL.B., Ph.D., F.A.S., F.R.A.S. (London)
*Formerly Professor and Head of the Department of Pali*
*and Ex-Dean, Faculty of Arts, Calcutta University*

CALCUTTA
THE WORLD PRESS PRIVATE LIMITED
1977

© Copyright 1977, The World Press Private Limited,
37A College Street, Calcutta-700073

Anukul Chandra Banerjee, 1911—

*First Published : 1977*

Published in India by S. Bhattacharjee for The World Press Private Limited, 37A College Street, Calcutta-700073 and Printed by P. K. Bhattacharjee at Alakananda Press, 80/6, Grey Street, Calcutta-700006

THE AUSTRALIAN
LIBRARY

# Preface

The Prātimokṣa Sūtra and the Bhikṣukarmavākya which were separately published more than two decades back in the Indian Historical Quarterly (now defunct) are now being published under the caption "Two Buddhist Vinaya Texts in Sanskrit" with very slight modifications only. The former contains a set of rules to be observed by the monks of the order, while the latter describes the stages of progress through which an aspirant is required to pass before he becomes a monk of the order. Both the treatises are long out of print, but they are in great demand. They, however, exist in Pali and the present ones are their Sanskrit versions agreeing fairly in their contents.

I take this occasion to thank my former colleague and pupil Dr. Sukumar Sengupta, M.A., Ph.D. for taking great pains in preparing the index and seeing the text through the press. Thanks are due to my student Dr. Rabindra Nath Basu, M.A. (Double), Ph.D., for his assistance in connection with the work.

Lastly, I must also thank the World Press Private Ltd. for the publication of this work.

Calcutta,
31st January, 1977.

Anukul Chandra Banerjee

# The Prātimokṣa Sūtra

The present text is based on the manuscript discovered at Gilgit in Kashmir[1].

The Pali word Pātimokkha has been variously explained. In the *Mahāvagga* is found its oldest explanation. It states: Pātimokkhan'ti ādimetaṃ mukhametaṃ pamukhametaṃ, kusalānaṃ dhammānaṃ tena vuccati Pātimokkhan'ti—Pātimokkha—it is the beginning (ādiṃ), it is the face (mukhaṃ), it is the chief (pamukhaṃ) of good qualities, it is called Pātimokkha. In his *Visuddhimagga* Buddhaghosa explains it: yo taṃ pāti rakkhati taṃ mokkheti moceti apāyikādidukkhehi tasmā Pātimokkhan'ti vuccati—whosoever observes the rules of Pātimokkha him it releases, delivers from sufferings such as of the inferior states and so it is called Pātimokkha. In the *Kaṅkhāvitaraṇī*, a commentary on the Pātimokkha by Buddhaghosa, we find—Pātimokkhan'ti atimokkhaṃ paṭippāmokkhaṃ atiseṭṭhaṃ ati-uttamaṃ—the Pātimokkha is that which is the highest, the extraordinary high, the very best and very highest. His *Samantapāsādikā*, a commentary on the Vinaya Piṭaka, further interprets it—Pātimokkhan' ti sīlaṃ patiṭṭhā ādicaraṇaṃ saṃyamo saṃvaro mukkhaṃ pamokkhaṃ kusalānaṃ dhammānaṃ samāpattiyā—it is the moral code, it is the foundation, it is the beginning, it is the good conduct, it is the abstinence, it is the vow, it is the foremost for the attainment of good quality.

In the Buddhist Sanskrit literature we have Prātimokṣa for Pātimokkha. One cannot naturally expect it so. But this is the usual form in Buddhist Sanskrit literature. Oldenberg thinks that it is derived from Prati+$\sqrt{\text{muc}}$ meaning: to set

[1] Several volumes, entitled *Gilgit Manuscripts*, on Vinaya, edited by the late Dr. N. Dutt, have already appeared in print, creating a stir in the world of Buddhist scholarship. They, however, cover only a portion of the whole collection.

free, to get rid of. But it should be noted that the word mokṣa cannot be derived from √muc. The word 'mokṣate' may be derived from √muc in the desiderative sense implying one's desire to be free. But this is not the exact sense of the word. So it is better to derive it from √mokṣa. We have thus Prati+√mokṣa=Prātimokṣa (svārthe a-pratyaya).

Of the five parts constituting the Vinaya Piṭaka the *Prātimokṣa Sūtra* is the nucleus around which the other parts have grown. It deals with the ecclesiastical offences requiring confession and expiation. In other words, it contains a set of rules to be observed by the members of the Order in their daily lives. There are two codes—one for the monks (bhikṣus) called the *Bhikṣuprātimokṣa Sūtra*, and the other for the nuns (bhikṣuṇīs) known as the *Bhikṣuṇīprātimokṣa Sūtra*. The former consists of eight sections, *viz*., *Pārājika*, *Saṃghāvaśeṣa* (*Saṅghādisesa*), *Aniyata*, *Naiḥsargikapāyantika* (*Nissaggiyapācittiya*), *Pāyantika* (*Pācittiya*), *Pratideśanīya* (*Pāṭidesanīya*), *Śaikṣya* (*Sekhiya*) and *Adhikaraṇaśamatha* (*Adhikarṇasamatha*), containing 258 offences, while the latter only seven sections comprising 311—there being no section corresponding to the *Aniyata* section of the *Bhikṣuprātimokṣa Sūtra*.

Pārājika which is the first section means literally one (a monk) who is defeated (parājito bhavati parājayamāpanno). In other words, it means an immoral act by which a monk is overcome (parājito), i.e. is not fit to remain in the Saṅgha (Order). It contains four offences which are sexual intercourse (maithunadharma), taking what is not given, i.e. theft (adattādāna), depriving a human being of life (manuṣyavigraha-vyaparopana) and falsely claiming superhuman qualities (uttaramanuṣyadharma) which do not belong to the ordinary man, all to be acquired by means of meditation. It corresponds to the Jaina 'pāraṃciya' in the sense of permanent exclusion. A monk committing any of the aforesaid offences is expelled from the Saṅgha (Order) and is not re-admitted into it. In other words, commission entails immediate and permanent expulsion.



Saṅghāvaśeṣa, the second section, is so called because the imposition of the punishment as also its revocation require a formal meeting of the Saṅgha (Order) at the beginning (ādi) as well as at the end (śeṣa). To be precise, only the Saṅgha (Order) is to deal with the sentence and re-instatement of the guilty monks. It deals with thirteen offences. Of these the first five (Nos. 1-5) relate to the sexual offences, the next two (Nos. 6-7) to the making of huts, two (Nos. 8-9) to false charges, two (Nos. 10-11) to schism in the Saṅgha (Order) and the last two (Nos. 12-13) to obduracy of monks and their refusal to proper exhortations. Commission of any of these entails punishment. The first nine offences become liable for punishment for the first commission while the rest after three formal requests for giving them up. The different kinds of punishments prescribed for committing a Saṅghāvaśeṣa offence are :—

(i) Mānatta—If a monk commits this offence but discloses it immediately, Mānatta is imposed on him, limited to six days only.

(ii) Parivāsa—If a monk committing this offence, conceals it for a number of days, Parivāsa is inflicted on him. In this case, in addition to the six days of penance prescribed for Mānatta, he had to do penance for the number of days between the commission of the offence and the date of its disclosure. A monk who has been visited with all or any one of the aforesaid punishments is re-admitted into the Saṅgha (Order) and restored to all the privileges through a procedure known as Abbhāna. The minimum number of monks required for this purpose is twenty.

Aniyata, the third section, contains two offences relating to the conduct of a monk with a nun. The punishment prescribed for the offence is undetermined. It varies according to the nature of the offence committed, if any. It may be either an offence of Pārājika or Saṅghāvaśeṣa or Pāyantika. An enquiry is, therefore, necessary to ascertain the nature of the offence and that is why it is called Aniyata.

Naiḥsargikapāyantika, the fourth section, contains thirty rules and is divided into three sub-sections: cīvara (robes) loma (wool) and pātra (bowl). Twenty-six of these rules refer to accepting gifts of robes, woollen blankets, bowl and medicine, i.e. butter, ghee, oil, honey and the like. The remaining four rules are miscellaneous ones. One is about the acceptance of gold and silver, two to buying and selling and the fourth about the appropriation of articles intended for the Saṅgha (Order) by a monk. The punishment prescribed for the breach of these rules is that the articles wrongly possessed by the monk must be given up and he must also express regret for it formally. In short, the punishment laid down is forfeiture and expiation.

Pāyantika, the fifth section, contains ninety rules on moral conduct, food, use of requisites and the like. They have not been classified on any recognised principles. They have been grouped more or less on a haphazard and promiscuous way. It seems that these rules were formulated to meet the circumstances and hence we find no conformity in their arrangement. The punishment prescribed for the offences is not serious. A guilty monk is required to confess his offence formally before a chapter of monks for his absolution.

Pratideśanīya, the sixth section, contains four rules which relate to the acceptance of the food by a monk. A monk committing any of the offences under this section is to confess his fault only. In other words, absolution is obtained by mere formal confession.

Śaikṣya, the seventh section, contains hundred and eight rules. These are chiefly rules of good conduct for the guidance of the monks in their daily life. They are not offences but rather general instructions for the observance of the monks, and so their violation does not entail any punishment at all.

Adhikaraṇaśamatha is the last and concluding section. It presents us with the rules to be observed for settlement of disputes among monks. It enumerates seven different modes of settlement, viz., Sammukhavinaya, Smṛtivinaya. Pratijñākāraka, Amūḍhavinaya, Yadbhūyasikāya, Tatsvabhāvaiṣiya and Tṛṇaprastāraka.



The offences have been grouped together according to their gravity, *i.e.*, from the graver to the lighter. Thus the text opens with the *Pārājika*—the most serious offence entailing expulsion from the Order and closes with the *Pratideśanīya*—the lightest one, the breach of which entails formal confession only. The *Prātimokṣa* rules, it may be remembered, were recited every fortnight in the Poṣadha (Uposatha) ceremony requiring all members of the Order to confess their sins of omission and commission committed, if any, during the preceding fortnight—the reason being to make the offender as well as the assembly pure. The *Prātimokṣa Sūtra* has several versions. It is preserved in Pali, Sanskrit, Tibetan and Chinese—the last two being translations from Sanskrit.

The present text, edited for the first time, is in Sanskrit. It belongs to the Mūlasarvāstivāda school which made its appearance in the early centuries of the Christian era in Kashmir and neighbouring regions, extending thence to Central Asia, Tibet and China. It had a canon of its own in Sanskrit—althoguh a complete copy of it is still a desideratum[1]. Some of them exist in fragments of manuscripts and others lost beyond recovery[2]. It is a matter for gratification that the manuscripts discovered at Gilgit cover a portion of the Vinaya Piṭaka, and the present text of the *Prātimokṣa Sūtra*, as already observed, belongs to this collection. They were written on birchbark in Gupta characters of the 5th or 6th century A.D.[3] There is, therefore, no reasonable room for doubt that our text belongs to that period. It was translated into Tibetan in

[1] Winternitz—*A History of Indian Literature*, vol. II, pp. 231ff.

[2] Hoernle—*Manuscript Remains of Buddhist Literature found in Eastern Turkestan.*

[3] *Gilgit Manuscripts*, vol. I, preface, and vol. III, pt. II, Introduction.

the 9th century A.D., and appears in the Fifth volume, Ca, of the *Bkaḥ-ḥgyur, Hdul-ba,* covering 30 folios only. The text known as the *So-sor-thar-pa* in Tibetan has been edited and translated into English by MM. S. C. Vidyabhusana[1]. There are no less than seven commentaries of this text extant in Tibetan. The number of commentaries proves its importance. From Nanjio[2] we learn that the *Prātimokṣa Sūtra* was also translated into Chinese by I-tsing (710 A.D.) who was interested in the Mūlasarvāstivāda school.

There is another Sanskrit text of the *Prātimokṣa Sūtra* edited by L. Finot[3] on the basis of the manuscript fragments discovered in Central Asia by Pelliot. It belongs to the Sarvāstivāda school. It has a fair affinity with our *Prātimokṣa Sūtra* and the Pali *Pātimokkha Sutta*. But there are divergences in the wording, arrangement and number of rules[4]. For instance, we read अवदलविपरिणतेन for उदीर्णविपरिणतेन (*Saṅghāvaśeṣa* No. 2) and आज्ञाविहेठनात् for अन्यवादविहेठनात् (*Pāyantika* No. 13) of the Sarvāstivāda version. Nos. 26, 27 and 28 of the *Naiḥsargikapātayantika* (*Naiḥsargikapāyantika*) rules of the Sarvāstivāda version correspond to those of 28, 26 and 27 respectively of the Mūlasarvāstivāda version—the numbers of each of the two versions answer to 24, 28 and 29 respectively of the *Nissaggiyapācittiya* rules of the Pali *Pātimokkha*. Nos. 7, 8 and 27 of the *Pāyantika* rules of the Sarvāstivāda agree with those of 8, 7 and 24 respectively of the Mūlasarvāstivāda —they are 8, 9 and 25 respectively of the Pali *Pātimokkha*. The *Prātimokṣa Sūtra* of the Sarvāstivāda school gives the number of *Pāyantika* rules as 90 and the *Śaikṣya* rules as 113 as against 90 and 108 respectively of the Mūlasarvāstivāda school, and the Pali *Pātimokkha* has 92 *Pācittiya* rules and 75

[1] Published by the Asiatic Society of Bengal, Calcutta, 1915.

[2] Nanjio's Catalogue, No. 1110.

[3] *Journal Asiatique*, November-December, 1913. It is to be noted that the text is incomplete.

[4] For details see Skt. *Prātimokṣa Sūtra* and the Pali *Pātimokkha Sutta.*



*Sekhiya* rules only—the total number being 263 in the Sarvāstivāda version, 258 in the Mūlasarvāstivāda version and 227 in the Pali. Both the versions contain at the beginning and at the end verses, but they are wanting in Pali. Thus the Sarvāstivāda and the Mūlasarvāstivāda texts have slight and negligible differences.

Traditions differ as to the relationship[1] between the versions of the Sarvāstivāda and the Mūlasarvāstivāda school. All these traditions have, of course, tried to establish the great antiquity of the Mūlasarvāstivāda, though, in fact, this school came into existence at a later date and claimed that it preserved the original tenets (mūla) of the Sarvāstivāda school.

Our manuscript is well-written though there are a few mistakes of the scribe with lacunae here and there. These lacunae have been supplied from the Tibetan text which is an infallible guide in this respect. The passages reconstructed have been put within brackets. Words not joined together according to the rules of Sandhi in the manuscript have been retained in the present edition. In reconstructiug the missing portions of the manuscript Finot's edition of the *Prātimokṣa Sūtra* has been of much help to me. In several instances words and sentences with slight modifications have been quoted *verbatim* in our edition. No. 82 of the *Pāyantika* rules of our text is a *verbatim* quotation from the *Divyāvadāna*.[2] The *Mahāvyutpatti* (ed. Sakkaki) has also been consulted in the preparation of this edition.

Incidentally it may be observed that the fragments of the manuscripts of the *Bhikṣuṇīprātimokṣa Sūtra* of the Sarvāstivāda school found at Turfan have been edited by E. Waldschmidt.[3] It exists in Tibetan and Chinese translations.

[1] Winternitz—*A History of Indian Literature*, vol. II, p. 231, fn. 2, *The History of Buddhism in India and Tibet*, Eng. Tran. from Tibetan, pt. II, by E. Obermiller, pp. 99-100,

[2] p. 543.

[3] E. Waldschmidt—*Bruchstücke des Bhikṣuṇīprātimokṣa der Sarvāstivādins*,

नमः सर्वज्ञाय ।।

प्रणम्य पूर्वं जगति प्रधानं
दुःखालयोत्तीर्णमनन्तपारम् ।
सर्वज्ञशिक्षापद [रत्नकोश][1]-
मुद्घाटयाम्यार्यगणस्य मध्ये ।।१।।

त्रैलोक्यविख्यातयशःपताकं
सद्धर्मनादोदितसिंहनादम् ।
सर्वङ्कषा[2] सादितरत्नकोशं
ब्रह्माण्डचुडामणिघृष्टपादम् ।।२।।

कृत्स्नस्यागाधपारस्य बौद्धस्य[3] विनयोदधेः ।
प्रतिष्ठाहृदयं[4] सारं प्रातिमोक्षोऽयमुच्यते ।।३।।

एष सद्धर्मराजस्य सद्धर्मालेख्यसंग्रहः ।
एष भिक्षु-वणिग्ग्रामः शिक्षापण्य-महापणः ।।४।।

एष दौ [:] शील्य[5] दुष्टानां विषविष्कम्भणोऽगदः ।
एष यौवन[6] विभ्रान्त-[कुमारद्विपदाङ्कुशः][7] ।।५।।

एष सागरगम्भीरसंसारोत्तरणप्लवः ।
एष क्लेशजयो मार्गो नृपतेरग्र [नायकः][8] ।।६।।

[1] Ms. बुद्ध... ; Tib. dkon-mchog-snod.

[2] Tib. thams-cad-mkhyer-pa = सर्वज्ञेन ।

[3] Ms. बोधस्य ; Tib. Saṅs-rgyas.

[4] Ms. oष्यादय ; Tib. sñiṅ.

[5] Ms. दौशील्य ।

[6] Ms. सौबन ; Tib. laṅ-tso.

[7] Tib. rkaṅ-gñis-gzhon-nuḥi-lcags-kyu-yin.

[8] Tib. ḥdren-pa.



एष मोक्षपुरारोहे[1] मूलसोपानवत् स्थितः[2] ।
निर्वृते मयि युष्माकमेष शास्तेत्यभिष्टुतः[3] ।।७।।

प्रातिमोक्षस्य श्रवणं दुर्लभं कल्पकोटिभिः ।
ग्रहणं धरणं चैवतिपत्तिः सुदुर्लभा ।।८।।

बुद्धानां सुखमुत्पादः सुखा धर्मस्य धीषणा ।
सुखा संघस्य सामग्री श्रमणानां तपः सुखम्[4] ।।९।।

सुखं दर्शनमार्याणां संवासोऽपि[5] सता सुखः ।
अदर्शनेन बालानां नित्यमेव सुखं भवेत्[6] ।।१०।।

[1] Ms. रूपो ; Tib. ḥjug-paḥi.

[2] Ms. oवर्जितः ; Tib. tham-skas-gzhi-daṅ-ḥdra-bar-gnas.

[3] Cf. Mahāparinibbāna Sutta, chapt. VI. 1. This verse is followed immediately by three other verses in the Sanskrit original. The first two agree partly with the Tibetan, while the third is quite wanting in it, and as such, they are omitted from the body of the text. We, however, reproduce the verses, as in the original, in the footnote here :

(i) स्वयं . . . . . क्षुममत्तं चैव यत्नतः ।
निहताक्षः समन्तः . . . . . . . ।।

(ii) . . . . नैभ्यल्यदीक्षितैः ।
प्रातिमोक्षः सदा रक्षो भिक्षुभिर्निर्मुमुक्षुभिः ।।

(iii) जित प्रवृत्तेप्यहिताय . . . . ।
कृतोपकारेष्यपकर्तुमीहते . . . . ।।

For Tibetan *So-sor-thar-pa* ed. Satish Chandra Vidyabhusana, pp. 45 and 46, verses 7 and 11.

[4] Cf. *Dhammapada*, Buddhavagga, v. 16.

[5] Ms. oवासोऽपि ; Tib. ḥgrogs-pa.

[6] Cf. *Dhammapada*, Sukhavagga, v. 10.

श्रृणोतु भदन्तः संघः अद्य[1] संघस्य पोषधः [चातुर्दशिकः][2] पाञ्चदशिको[3] वा सचेत्[4] संघस्य प्राप्तकालं क्षमेतानुजानीयात् संघो यत्संघस्य पोषधं कुर्यात् प्रातिमोक्षसूत्रो [द्देश][5]येदेषाज्ञप्तिः ।

पोषधं वयमायुष्मन् करिष्यामः प्रातिमोक्षसूत्रोद्देशमुद्देशामः । यस्य स्या[त् आपत्तिः तेन आवि][6]ष्कर्तव्या । आपत्त्यां[7] [असत्यां][8] तूष्णीं भवितव्यम् । तूष्णींभावेन[9] च वयम् आयुष्मतः [परि]शुद्धान्[10] वेदयिष्यामः । यथापि प्रत्येकं पृष्टस्य भिक्षोर्व्याकरणं भवति एवमे[वं एवंरूपा]यं[11] भिक्षु[पर्षदि या][12]वत् त्रिरप्यनुश्रावणं[13] भवति । यः पुनर्भिक्षुरेवंरूपायां भिक्षुपर्षदि यावत् त्रिरपि [अनुश्राव्यमाने स्म]रन्[14] सतीमापत्तिं नाविष्करोति संप्रजानन् मृषावादोऽस्य भवति । संप्रजानन् मृषावादः ख[लु आयुष्मन्तः अन्तरायिको धर्म उक्तो भगवता । तस्मात् स्मरता भिक्षुणा आपन्नेन विशुद्धापेक्षेण सती

1 Ms. अन्य ; Tib. deṅ.

2 Tib. bcu-bzhi-pa.

3 Ms. ०दशकी ।

4 The word सचेत्, Pali सचे, conveys the sense of Skt. तच्चेत् ; cf. Pali सेय्यथा = Skt. तद्यथा ।

5 Tib. gdon-no.

6 Tib. ltuṅ-ba-yod-pa-des-ḥthol-cig.

7 Ms. श्रामत्यां ; Tib. ltuṅ-ba.

8 Tib. med-na.

9 Ms. तुष्णिभाबेन ; Tib. mi-smra-na.

10 Ms. शुद्ध ; Tib. yoṅs-su-dag-par.

11 Tib. de-bzhin-du......ḥdi-lta-bu.

12 Tib. dge-sloṅ-gi-ḥkhor.

13 Ms....वर्ति ; Tib. lan-gsum-du-driḥo.

14 Tib. bsgrags-pa-na. dran.



आपत्तिराविष्कर्तव्या । आविष्कृतेनास्य फासु भवति नाविष्कृतेन न भवति ।][1]

[उद्दिष्टं खलु मयायुष्मन्तः प्रातिमोक्षसूत्रोद्देशनिदानम् । तत्रायुष्मतः पृच्छामि—कश्चित्स्थात्र परिशुद्धाः ?

द्विरपि त्रिरपि पृच्छामि—कश्चित्स्थात्र परिशुद्धाः ?

अत्रायुष्मन्तो यस्मात् तूष्णीमेवमेतद् धारयामि ।][2]

1 *So-sor-thar-pa*, p. 49, l. 18-20 and p. 50, l. 1-2 ; cf. Finot's edition.

2 *Ibid.*, p. 50, l. 2-7 cf ; *op.* cit.

[चत्वारः पाराजिका धर्माः ।][1]

[इमे खलु आयुष्मन्तश्चत्वारः पाराजिका धर्मा अन्वर्धमासं प्रातिमोक्ष-सूत्रोद्देशमागच्छन्ति ।][2]

१। [यः पुनर्भिक्षुर्भिक्षूणां शिक्षासाजीवसमापन्नः[3] शिक्षामप्रत्याख्याय शिक्षादौर्वल्यमनाविष्कृत्याब्रह्मचर्यं मैथुनं धर्मं प्रतिसेवते अन्ततस्तिर्यग्योनिगतयापि सार्धं, अयमपि भिक्षुः पाराजिको भवत्यसंवास्यः ।][4]

२। [यः पुनर्भिक्षुर्ग्रामगतमरण्यगतं वा परेषां अदत्तं स्तेयसंख्यातमाददीत यद्रूपेणादत्तादानेन राजा वैनं गृहीत्वा राजमात्रो वा हन्याद्वा संबध्नीयाद्वा प्रवासयेद्वा एवं चैनं वदेत्—त्वं भोः पुरुष चौरोऽसि बालोऽसि स्तेनोऽसीत्येवंरूपं अदत्तं भिक्षुः आददीत, अयमपि भिक्षुः पाराजिको भवत्यसंवास्यः ।][5]

३। [यः पुनर्भिक्षुर्मनुष्यं वा मनुष्यविग्रहं वा स्वहस्तेन संचिन्त्य जीविताद् व्यपरोपयेत्][6] शस्त्रं वैनामाधारयेत् शास्त्रधारकं वास्य पर्येषेत मरणाय वैनं समादापयेत् मरणवर्णं वास्यानुसंवर्णयेत्। एवं चैनं वदेत—हंभो पुरुष किं तव[7] पापकेनाशुचिना दुर्जीवितेन [मृतं ते भो पुरुष जीविताद्व][8] रमितिचिन्तानुमतैश्चित्तसंकल्पैरनेकपर्यायेण मरणाय वैनं

[1] Tib. pham-par-ḥgyur-baḥi-chos-bzhi

[2] *So-sor-thar-pa*, p. 50, l. 14-15 ; cf. Finot's edition.

[3] *Suttavibhaṅga*, (P.T.S.,) ed.,) p. 24 : sājīvaṃ nāma yaṃ bhagavatā paññattaṃ sikkhāpadaṃ etaṃ sājīvaṃ nāma. Here sājīva=sajjīva, ā in sā⁰ being due to compensation.

[4] *So-sor-thar-pa*, p. 50, l. 16-18 and p. 51, l. 1-2 ; cf. Finot's edition.

[5] *Ibid.*, p. 51, l. 3-9 ; cf. *op. cit.*

[6] *Ibid.*, p. 51, l. 10-11.

[7] Ms. तेन ; Tib. khyod.

[8] Tib. gson-pa-bas-shi-blaḥo-zhes-zer-zhiṅ.



समादापयेत् [मरणवर्णं][1] वास्य अनुसं [वर्णयेत्][2] स च तेन कालं कुर्यात्, अयमपि भिक्षुः पाराजिको भवत्यसंवास्यः ।

४। यः पुनर्भिक्षुरनभिजानन्नपरिजानन्नसन्तमसंविद्यमानमनुत्तरमनुष्यधर्ममल [मार्य][3] विशेषा [धिगमं ज्ञानं वा][4] दर्शनं स्पर्शविहारतां वा प्रतिजानीयादिदं जानामीदं पश्यामीति स परेण समयेन समनुयुज्यमानो वा असमनुयुज्यमानो वा [आपन्नो][5] विशुद्धिं प्रक्ष्यैवं वदेदजानन्नेवाहमायु [ष्मन्तोऽ][6] वोचं [जानामीति][7] पश्यामीति रिक्तं तुच्छं मृषाव्यपलपनमन्यत्राभि [मानात्][8], अयमपि भिक्षुः [पाराजिको भवत्यसं][9] वास्यः[10] ।

उद्दिष्टा मयायुष्मन्तश्चत्वारः पाराजिका धर्मा, येषां भिक्षुरन्यतमान्यतममापत्तिमध्यापत्य न लभते भिक्षुभिः सार्धं संवासं भोगं वा, यथापूर्वं च तथा[11] पश्चात् पाराजिको भवत्यसंवास्यः ।

तत्राहमायुष्मन्तः परिपृच्छामि—कश्चित्स्थात्र परिशुद्धाः ?

द्विरपि त्रिरपि परिपृच्छामि—कश्चित्स्थात्र परिशुद्धा ?

परिशुद्धा अत्रायुष्मन्तो यस्मा [त्तूष्णी][12] मेवमेतद् धारयामि ।

[1] Tib. ḥchi-baḥi-bsṅags-pa.

[2] Tib. brjod-de.

[3] Tib. ḥphags-pa.

[4] Tib. bye-brag-thob-pa-daṅ. shes-pa-daṅ.

[5] Tib. khas-ḥches-pa-las-de-ltuṅ-ba-byuṅ-ba.

[6] Tib. tshe-daṅ-ldan-pa-dag.

[7] Tib. sheso.

[8] Tib. mṅon-paḥi-ṅa-rgyal.

[9] Tib. pham-par-gyur-pa-yiṅ-gyis. gnas-par-mi-byaḥo.

[10] Ms. ०वास्य ।

[11] Ms. यथा ; Tib. de-bzhin.

[12] Tib. caṅ-mi-smra-bas.

[संघावशेषा धर्माः ।][1]

इमे[2] खलु आयुष्मन्तस्त्रयोदश संघावशेषा धर्मा अन्वर्धमासं प्रातिमोक्षसूत्रोद्देशमागच्छन्ति--

१। संचिन्त्य शुक्रविसृष्टिरन्यत्र स्वप्नान्तरात्, [संघा][3] वशेषः।

२। यः पुनर्भिक्षुरवदलविपरिणतेन चित्तेन मातृग्रामेण सार्धं काय [संसर्गं][4] समापद्येत हस्तग्रहणं वा बाहुग्रहणं वा वेणीग्रहणं वा अन्यतमान्यतमस्य वा अङ्गप्रत्यङ्गसंस्पर्शनं वा अङ्गमर्षणं स्वीकुर्यात्, संघावशेषः।

३। यः पुनर्भिक्षु [रवदलविपरिणतेन चित्तेन मातृग्राभं दुष्ठुलया][5] पापिकया असभ्यया मैथुनोपसंहितया [वाचा आभाषेत][6] यथापि [तां युवा][7] युवतिं, संघावशेषः।

४। यः पुनर्भिक्षुरवदलविपरिणतेन चित्तेन मातृग्रामस्य पुरस्तादात्मनस्कायपरि [चर्यां संवर्णयेत् एतदग्रं मातृस्वसः परि][8] चर्याणां यदुत मादृशं भिक्षुं शीलवन्तं कल्याण [धर्मं ब्रह्मचारिण][9] मनेन धर्मेण परिचरेत् यदुत मैथुनोपसंहितेन इति, संघावशेषः।

५। [यः पुनर्भिक्षुः संच][10] रित्रं समापद्येत स्त्रियं वा पुरुषमतेन पुरुषं

[1] Tib. dge-ḥdun-lhag-maḥi-chos.

[2] Ms. इह ; Tib. ḥdi-dag.

[3] Tib. dge-ḥdun-lhag-ma.

[4] Tib. reg-par-byed.

[5] Tib. dral-ciṅ-gyur-paḥi-sems-kyis. bud-med-kyi-yul-la-gnas-ṅan-len.

[6] Tib. tshig......smras-na.

[7] Tib. skyes-bu-na.

[8] Tib. lus-kyi-bsñen-bkur-bya-baḥi-phyir......sru-ḥdi-bsñen-bkur-byas-pa-rnams-kyi-mchog.

[9] Tib. dge-baḥi-chos-can-tshaṅs-par-spyod-pa.

[10] Tib. yaṅ-dge-sloṅ-gaṅ. smyan-byed-na.



वा स्त्रीमतेन जायात्वेन वा जा[रीत्वेन वा अन्ततस्तत्][1] क्षणिकायामपि, संघावशेषः।

६। स्वयं याचिता भिक्षुणा कुटिं कारयित्वा अस्वा[मिकं आत्मोद्देशकां][2] प्रामाणिका कुटिः कारयितव्या। तत्रेदं कुट्याः प्रमाणं—दैर्घ्येण द्वादश वितस्तयः [सुगतवितस्त्या तिर्य्यक्][3] सप्तान्तरतः। तेन भिक्षुणा भिक्षवोऽभिनेतव्याः वास्तुदर्शनाय। अभिनीतैर्भिक्षुभिः वास्तु द्रष्टव्यम् अनारम्भं सपरिक्रमम्। सारम्भे चेद्भिक्षुर्वास्तुन्यपराक्रमे स्वयं याचितां कुटिं कारयेत् अस्वामिकां आत्मोद्देशकां भिक्षूंश्च [नाभिनयेद्वास्तु][4] दर्शनाय अनभिनीतैर्भिक्षुभिः अदर्शितवास्तुनि प्रमाणं चातिक्रमेत्, संघावशेषः।

७। [महल्लकं पुनर्भिक्षुः][5] विहारं कारय[मानः स][6] स्वामिकं संघोद्देशकं तेन भिक्षुणा भिक्षवोऽभिहितव्या वास्तुदर्शनाय। अतः [अभिनी][7] तैर्भिक्षुभिर्वास्तु द्रष्टव्यमनारम्भं सपरिक्रमम्। सारम्भे चेद्भिक्षुर्वास्तुन्यपरिक्रमे महन्तं विहारं कारयित्वा यत्सस्वामिकं संघोद्देशकं [भिक्षूंश्च नाभिनयेत्][8] वास्तुदर्शनाय, [संघा][9] वशेषः।

८। यः पुनर्भिक्षुर्द्विष्टोद्देशादप्रतीतः शुद्धं भिक्षुं [अमूलकेन पाराजिकेन धर्मेणानुध्वंस][10] येदप्येवैनं ब्रह्मचर्याच्च्यावयेयमिति, तस्य च

[1] Tib. mdzaḥ-na-mo-ñid-du...tha-na-thaṅ-ḥgaḥ-phrad-pa-yaṅ ruṅ-ste.

[2] Tib. bdag-po-med. bdag-gyi-phyir.

[3] Tib. bde-bar-gshegs-paḥi-mthoḥi...zheṅ-du-mtho.

[4] Tib. gzhi-blta-baḥi phyir......mi-khrid-dam.

[5] Tib. dge-sloṅ-gis......chen-po.

[6] Tib. bdag-po-yod-pa......brtsig-tu-ḥjug-na.

[7] Tib. khrid-paḥi.

[8] Tib. dge-sloṅ-dag-kyaṅ-mi-khrid-dam.

[9] Tib. dge-ḥdun-lhag-ma.

[10] Tib. gzhi-med-par-pham-par-gyur-baḥi-chos-kyis-skur-pa-las.

संघमेदाय निःसृज इमामेवंरूपां संघभेदकरां कथाम्। एवं ते भिक्षवो भिक्षुभिः द्विरपि त्रिरपि समनुयोक्तव्याः सुमनुशासितव्यास्तस्य वस्तुनः प्रतिनिःसर्गाय, द्विरपि त्रिरपि समनुयोत्तव्याः समनुशासितव्याः प्रतिनिःसृजेयुः, इत्येवं कुशलं नो चेत् प्रतिनिःसृजेयुः, संघावशेषः।][1]

१२। [संबहुला भिक्षवः अन्यतमं ग्रामं वा निगमं वा उपनिःश्रित्य विहरेयुस्ते च स्युः कुलदूषकाः पापसमाचाराः, तेषां च कुलानि दुष्टानि दृश्येरन् वा श्रूयेरन् या प्रज्ञायेरन् वा। ते भिक्षवः भिक्षुभिरेवं स्युर्वचनीयाः—आयुष्मन्तः कुलदूषकाः पापसमाचाराः, युष्माकम् कुलानि दुष्टानि दृश्यन्ते पि श्रूयन्ते पि प्रज्ञायन्ते पि, युष्माकम् च ते पापसमाचारा दृश्यन्ते पि श्रूयन्ते पि प्रज्ञायन्ते पि, प्रक्रमध्वं आयुष्मन्तः यूयं अस्मादावासादलं युष्माकं इह वासेनेति एवं चेत् ते भिक्षवस्तान् भिक्षून् वदेयुः—छन्दगामिन आयुष्मन्तः भिक्षव द्वेषगामिनो मोहगामिनो भयगामिनश्च, एवंरूपायाः आपत्त्याः एकत्य भिक्षून् प्रवासयत्त्येकत्य भिक्षून् न प्रवासयन्तीति। तत्र भिक्षवः एवं स्युर्वचनीयाः—मा आयुष्मन्तरेवं वदत, एकत्य भिक्षवश्छन्दगामिनो द्वेषगामिनो मोहगामिनो भयगामिनश्च, एवंरूपायाः आपत्त्याः एकत्य भिक्षून् प्रवासयत्त्येकत्य भिक्षून् न प्रवासयन्तीति। तत् कस्माद्धेतोः। नेमे भिक्षवश्छन्दगामिनो द्वेषगामिनो मोहगामिनो भयगामिनश्च आयुष्मन्त खलु कुलदूषकाः पापसमाचाराः, युष्माकं कुलानि दुष्टानि दृश्यन्ते पि श्रूयन्ते पि, पापकाश्च युष्माकम् समाचारा दृश्यन्ते पि श्रूयन्तेपि प्रज्ञायन्ते पि। भिक्षव आयुष्मन्तश्छन्दगामिनो द्वेषगामिनो मोहगामिनो भयगामिनश्च—निःसृजत इमामेवंरूपां कथाम्। ते भिक्षवः भिक्षुभिरेवं भासितव्याः—एवं चेत् प्रतिनिःसृजेयुः इत्येवं कुशलं, नो चेत् प्रतिनिःसृजेयुः द्विरपि त्रिरपि समनुयोक्तव्याः समनुशासितव्यास्तस्य प्रतिनिःसर्गाय, द्विरपि त्रिरपि समनुयोक्तव्याः

[1] *So-sor-thar-pa*, p. 57, I. 8-20 and p. 58. I. 1-18 ; cf. Finot's edition.



समनुशासितव्याः प्रतिनिःसृजेयुः इत्येवं कुशलं, नो चेत् प्रतिनिःसृजेयुः संघावशेषः। ][1]

१३। [ भिक्षुरिह कश्चित् दुर्वाच्यस्वभावो भवति, उद्देश्यपर्यापन्नैः शिक्षापदैः सुगतसूत्रपर्यापन्नैः भिक्षुभिः सहधर्मेण सहविनयेनोच्यमान आत्मानमवचनीयं करोति—मा मामायुष्मन्तः यूयं किञ्चिद्वदत कल्याणमकल्याणं वा, अहमपि आयुष्मतः न किञ्चित् वक्ष्यामि कल्याणमकल्याणं वा, विरमन्तु आयुष्मन्तः मम वचनात्, अहमपि विरंस्यामि युष्माकं वचनादिति। स भिक्षुर्भिक्षुभिरेवं स्याद्वचनीयो—आयुष्मन् उद्देश्यपर्यापन्नैः शिक्षापदैः सुगतसूत्रपर्यापन्नैः भिक्षुभिः सहधर्मेण सहविनयेनोच्यमान आत्मानं त्वं अवचनीयं करोसि, आयुष्मन् वचनीयमेव आत्मानं करोतु, आयुष्मन्तं भिक्षवो सहधर्मेण सहविनयेन वदन्तु, आयुष्मानपि भिक्षून् सहधर्मेण सहविनयेन वदतु, एवं संबद्धा हि तस्य भगवतः तथागतस्य अर्हतो सम्यकसंबुद्धस्य परिषद् यदिदं अन्योन्यवचनात् अन्योन्यापत्तिव्युत्थापनादिति मायुष्मन् आत्मानं अवचनीयं करोतु। स भिक्षुर्भिक्षुभिरेवं भासितव्यः—एवं चेत् तद्वस्तु प्रतिनिःसृजेत् इत्येवं कुशलं, नो चेत् प्रतिनिःसृजेत् द्विरपि त्रिरपि समनुयोक्तव्यः समनुशासितव्यस्तस्य प्रतिनिःसर्गाय, द्विरपि त्रिरपि समनुयोक्तव्यः समनुशासितव्यः प्रतिनिःसृजेत् तद्वस्तु इत्येवं कुशलं, नो चेत् प्रतिनिःसुजेत्, संघावशेषः। ][2]

[ उद्दिष्टा मयायुष्मन्तस्त्रयोदश संघावशेषा धर्माः। नव प्रथमापत्तयश्चत्वारो यावत्तृतीयका, येषां भिक्षुरन्यतमान्यतमं धर्ममापन्नो यावत् कालं जानन् प्रतिछादयति तावत् कालं तेन अकामतः पर्युषितव्यम्। अकामतः पर्युषितपरिवासेन भिक्षुणा उत्तरिषड्रात्रं संघमानत्वं चर्त्तव्यं भवति। ][3]

[1] *So-sor-thar-pa*, p. 58, I. 19, p. 60, I. 12 ; cf. Finot's edition.

[2] *Ibid.*, p. 60, I. 13, p. 61, I. 21 ; cf. Finot's edition.

[3] *Ibid.*, p. 62, I. 1-8 ; cf. *op. cit.*

चीर्णमानत्तो भिक्षुरावर्हणप्रतिबद्धः कृतानुधर्मः भिक्षुसंघस्य आराधितचित्तो यत्रस्याद्विंशतिगणो भिक्षु [संघस्त][1]त्र च [सो][2] भिक्षुरावर्हितव्यः। एकेनापि चेदूनो विंशतिगणे भिक्षुसंघस्तं भिक्षुमावर्हेत् स च भिक्षुरनात्रीडस्ते च भिक्षवो गार्ह्याः, तत्र समयः।

यत्राहं आयुष्मतः परिपृच्छामि—कश्चित्स्थात्र परिशुद्धाः ?
द्विरपि त्रिरपि परिपृच्छामि—कश्चित्स्थात्र परिशुद्धाः ?
परिशुद्धा अत्रायुष्मन्तो यस्मात्तूष्णीमेवैतद् धारयामि।

[1] Tib. dge-ḥdun.
[2] Tib. de.



[द्वावनियतौ धर्मौ।][1]

इमौ खलु आयुष्मन्तौ द्वौ अनियतौ धर्मौ अन्वर्धमासं प्रातिमोक्ष-सूत्रोद्देशमागच्छतः।

१। यः पुनर्भिक्षुर्मातृग्रामेण सार्धमेक एकिकया रहसि प्रतिच्छत्रे आसने निषद्यां[2] कल्पयेदलंकामयितुम्। सचेच्छ्राद्धेयवचनोपासिका[3] त्रयाणां धर्माणां अन्यतमान्यतमधर्मेण वदेत् पाराजिकेन वा संघादिशेषेण वा पायन्तिकेन वा निषद्यां भिक्षुः प्रति[जानमानः][4] त्रयाणां धर्माणां अन्यतमान्यतमेन धर्मेण कारयितव्यः पाराजिकेन वा संघावशेषेण वा पायन्तिकेन वा येन येन वा पुनः श्राद्धेयवचनोपासिका तं भिक्षुं धर्मेण वदेत् तेन तेन धर्मेण स भिक्षुः कारयितव्यो[5]ऽयं धर्मोनियतः।

२। यः पुनर्भिक्षुर्मातृग्रामेण सार्धमेक एकिकया रहसि प्रतिच्छत्रे आसने निषद्यां[6] कल्पयेन्नालंकामयितुम्। सचेच्छ्राद्धेयवचनोपासिका द्वयोर्धर्मयोः अन्यतमान्यतमधर्मेण वदेत् संघावशेषेण वा पायन्तिकेन वा निषद्यां[7] भिक्षु प्रतिजानतो [द्वयोर्धर्मयोः][8] संघावशेषेण वा [पायन्तिकेन वा][9] येन येन वा पुनः श्राद्धेयवचनोपासिका [तं][10] भिक्षुं धर्मेण वदेत् तेन तेन धर्मेण स भिक्षुः कारयितव्योऽयमापि धर्मोनियतः।

[1] Tib. ma-ṅes-paḥi-chos-gñis.
[2] Ms. निषिद्यां
[3] Ms. उद्देशको ; Tib. dge-bsñen-ma.
[4] Tib. khas-blaṅs-na.
[5] Ms. कारियितव्यो
[6] Ms. निषिद्यां
[7] Ms. निषिद्यां
[8] Tib. chos-gñis-po.
[9] Tib. ltuṅ-byed.
[10] Tib. de.

उद्दिष्टा मे आयुष्मन्तः द्वौ अनियतौ धर्मौ। तत्राहमायुष्मतः परिपृच्छामि—कश्चित्स्थात्र परिशुद्धाः? द्विरपि त्रिरपि परिपृच्छामि—कश्चित्स्थात्र परिशुद्धाः?

परिशुद्धा अत्रायुष्मन्तो यस्मात्तूष्णीमेवमेतद् धारयामि।



[ त्रिंशन्नैसर्गिकपायन्तिका धर्माः। ][1]

इमे खलु आयुष्मन्तस्त्रिंशन्नैसर्गिकाः पायन्तिका धर्मा अन्वर्धमासं प्रातिमोक्षसूत्रोद्देशमागच्छन्ति।

१। निष्ठितचीवरेण भिक्षुणा उद्धृते कठिने दशाहपरमं[2] अतिरेकचीवरमविकल्पितं धारयितव्यं ततः उत्तरि धारयेन्नैसर्गिका[3] पायन्तिका।

२। निष्ठितचीवरो भिक्षुः उद्धृतकठिने एकरात्रमपि चेत् त्रयाणां चीवराणां अन्यतमान्यतमस्य चीवरात् बहिः सीमां विप्रवसेत् अन्यत्र संघसंमत्या[4] नैसर्गिकपायन्तिका।

३। निष्ठितचीवरस्य भिक्षोरुद्धृते कठिने उत्पत्य अकालचीवरमाकांक्षिना तेन भिक्षुणा तच्चीवरं प्रतिग्रहीतव्यं प्रतिगृह्य सचेत्परिपूर्यते क्षिप्रमेव कृत्वा धारयितव्यम्। नोचेत्परिपूर्यते मासपरमं तेन भिक्षुणा तच्चीवरमुपनिक्षिप्तव्यं सत्यां चीवरप्रत्याशायां ऊनस्य वा परिपूरयेत्, ततः उत्तरि उपनिक्षिपेत्, नैसर्गिक[पायन्तिका][5]।

४। यः पुनर्भिक्षुरज्ञातिकया भिक्षुण्या पुराणचीवरं धावयेद्रंजयेदाकोटयेद्वा नैसर्गिकपायन्तिका।

५। यः पुनर्भिक्षुरज्ञातिकया भिक्षुण्या अन्तिकाच्चीवरं प्रतिगृह्णीयादन्यत्र परिवर्तकान्नैसर्गिकपायन्तिका।

६। यः पुनर्भिक्षुरज्ञातिगृहपतिं गृहपतिपत्नीं वोपसंक्रम्य चीवरं विज्ञापयेदन्यत्र समयान्नैसर्गिकपान्तिका। तत्रायं समय आच्छिन्नचीवरो भिक्षु र्भवति नष्टचीवरो दग्धचीवरो ऊढ़चीवरो हृतचीवरोयं तत्र समयः।

७। आच्छिन्नचीवरेण भिक्षुणा नष्टचीवरेण दग्धचीवरेण ऊढ़चीवरेण

[1] Tib. Spaṅ-baḥi-ltuṅ-byed-kyi-chos-sum-bcu.

[2] Ms. दशां आपरं; Tib. zhag-bcuḥi-bar-du.

[3] Ms. धरयेणै॰; Tib. ḥchaṅ-na-spaṅ-baḥi-ltuṅ-bed-do.

[4] Ms. ॰संवृत्या; Tib. dge-ḥdun-gyis-gnaṅ-ba.

[5] Tib. Spaṅ-baḥi-ltuṅ-byed-do.

हृतचीवरेणाज्ञातिगृहपतिना गृहपतिपत्नीं वोपसंक्रम्य चीवरं बिज्ञापयितव्यः तं चेच्छ्राद्धो ब्राह्मणो गृहपतिर्वा त्यर्थं संबहलैश्चीवरैः प्रवारयेत् आकांक्षता तेन भिक्षुणा सान्तरोत्तर [परमं][1] तस्माच्चीवरं प्रति [ग्रहीतव्यं][2] तत उत्तरि प्रतिगृह्णीयान्नैसर्गिका पायन्तिका ।

८। भिक्षुं खल्दिश्याज्ञातिना गृहपतिना गृहपतिपत्न्या वा चीवरचेतनकानि प्रत्युपस्थापितानि स्युः एभिरहं चीवरचेतनकैरे [वंरूपं][3] चैवंरूपं[4] च चीवरं चेतयित्वा[5] एवंनामा भिक्षुरुपसंक्रमिष्यति तमाच्छादयिष्यामि चीवरेण काले कल्पिकेनेति। तत्र चैको भिक्षुः पूर्वमपवारितः सन् कंचिदेव [विकल्पं][6] प्रतिपद्य तमज्ञातिं गृहपतिं गृहपतिपत्नीं वोपसंक्रम्यैवं [वदेत्—यानि तानि आयुष्मता मा[7]] मुद्दिश्य चीवरतेनकानि प्रत्युपस्थापितानि साध्यायुष्मंस्ते चीवरचेतनकैरेवरूपं चैवंरूपं च चीवरं चेतयित्वा आच्छादयेऽहं चीवरेण कालेन कल्पिकेनेति। अभिनिष्पन्ने चीवरे नैसर्गिका पायन्तिका ।

९। भिक्षुं खल्दिश्याज्ञातिना गृहपतिना गृहपतिपत्न्या च प्रत्येकप्रत्येकानि चीवरचेतनकानि प्रत्युपस्थापितानि स्युः। एभिरावां प्रत्येकप्रत्येकैः चीवरचेतनकैरेवंरूपं चैवंरूपं च प्रत्येकप्रत्येकं चीवरं चेतयित्वा एवंनामा भिक्षुरुपसंक्रमिष्यति तमाच्छादयिष्यावः। प्रत्येकप्रत्येकाभ्यां चीवरचेतनकाभ्यां काले कल्पिकाभ्यामिति। तत्र चेत्स भिक्षुः पूर्वम-

[1] Tib. gos-stod-gyogs-smad-gyogs-daṅ-bcas-paḥi-mthar-thug-pa.

[2] Tib. blaṅ-bar-byaḥo.

[3] Tib. ḥdi-lta-bu.

[4] Tib. omits it.

[5] Ms. चेतयित्वा ; Tib. ños-la.

[6] Tib. rtogs-pa.

[7] Tib tshe-daṅ-ldan-pas-bdag-gi-phyir......gān-dag-de-dag ...smras-te.



प्रवारितः सन् कंचिदेव विकल्पमापत्य तमज्ञातिगृहपतिं गृहपतिपत्नीं वोपसंक्रम्यैवं वदेद्यानि तान्यायुष्मत्यास्मानुद्दिश्य प्रत्येकप्रत्येकानि चीवरचेतनकानि प्रत्युपस्थापितानि। साध्वायुष्मन्तौ तौ प्रत्येकप्रत्येकैश्चीवरचेतनकैरेवंरूपं चैवंरूपं च चीवरं चेतयित्वा आच्छादयतामुभावपि भूत्वा एकैकेन चीवरेण काले कल्पिकेन कल्याणकामतामुपादायाभिनिष्पन्ने चीवरे नैसर्गिका पायन्तिका ।

१०। भिक्षुं खलु [दिश्य राज्ञा][1] वा राजमात्रेण वा ब्राह्मणेन वा गृहपतिना वा नैगमेन वा जानपदेन वा धनिना वा श्रेष्ठिना वा सार्थवाहेन वा दूतस्य हस्ते चीवरचेतकानि अनुप्रेषितानि स्युः। अथ स दूतस्तानि चेतनकानि [आदाय येन][2] स भिक्षुस्तेनोपसंक्रामेदुपसंक्रम्य तं भिक्षुमेवं वदेत्। यत्खल्वार्य जानीयात् [त्वामुद्दिश्य राज्ञा वा राजमात्रेण वा][3] ब्राह्मणेन वा गृहपतिना वा नैगमेन वा जानपदेन वा धनिना वा श्रेष्ठिना वा सार्थवाहेन वा चीवरचेतनकेन वानुप्रेषितान्यार्यं प्रतिगृह्णात्वनुकंपामुपादाय। तेन भिक्षुणा स दूत इदं स्याद्वचनीयः—गच्छायुष्मन् दूत भिक्षूणां चीवरचेतनकानि पत्यन्ते परिग्रहीतुम्। चीवरं तु वयं लब्ध्वा प्रतिगृह्णीमः काले कल्पिकं। स दूतस्तं भिक्षुमेवं वदेदस्ति कश्चिदार्याणां वैय्यावृत्यकरो, य आर्याणां वैय्यावृत्यं प्रत्यनुभवतीति। चीवरार्थिकेन भिक्षुणा वैय्यावृत्यकरो व्यपदेष्टव्यः आरामिको वा उपासको बा एते दूत भिक्षुणां वैय्यावृत्यकरो एते भिक्षूणां वैय्यावृत्यं प्रत्यनुभवन्तीति। अथ स दूतस्तानि चीवरचेतनकराण्यादाय येन स वैय्यावृत्यकरस्तेनोपसंक्रामेत्। उपसंक्रम्य तं वैय्यावृत्यकरमेवं वदेत्। खल्वायुष्मन् वैय्यावृत्यकर जानीया एभिस्तं चीवरचेतनकैरेवंरूपं चैवंरूपं च चीवरं चेतयित्वा एवंनामा भिक्षुरुपसंक्रमिष्यति तमाच्छादयेथा चीवरेण काले कल्पितेनेति। अथ स

[1] Tib. phyir-rgyal-poḥam.

[2] Tib. ga-la-ba......phyin-nas.

[3] Tib. khyod-la-rgyal-poḥam. blon-po-chen-po-ḥam.

दूतस्तं वैय्यावृत्यकरं साधु च सुष्ठु च समनुयुज्य समनुशिष्य येन स भिक्षुस्तेन संक्रामेत्। उपसंक्रम्य तं भिक्षुमेवं वदेत् योऽसावार्येण वैय्यावृत्यकरो व्यपदिष्टः समनुशिष्टः समयेन[1] तमुपसंक्रामेथा आच्छादयिष्यति स सत्वां[2] चीवरेण काले कल्पितेनिति। चीवरार्थिकेन भिक्षुणा वैय्यावृत्यकर उपसंक्रम्य द्विस्त्रिश्चोदयितव्यः स्मारयितव्यो[3]ऽर्थिकोस्म्यायुष्मन् वैय्यावृत्यकर चीवरेणार्थिकोस्म्यायुष्यन् वैय्यावृत्यकर चीवरेणेति। द्विस्त्रिश्चोदयतः स्मारयतः[4] सचेत्तच्चीवरमभिनिष्पद्यते इत्येवं कुशलं नो चेदभिनिष्पद्येत चतुष्पंचषट्कृत्वा परं तूष्णीमुद्देशे स्थातव्यं, चतुष्पंचषट्कृत्वा परं तूष्णहीमुद्देशे स्थितस्य सचेत्तच्चीवरमभिनिष्पद्येत इत्येवं कुशलं, नो चेदभिनिष्पद्येत न उत्तरि ध्यायच्छेच्चीवरस्याभिनिवर्तये, अभिनिष्पन्ने चीवरे नैसर्गिकपायन्तिका। नो चेदभिनिष्पद्येत यस्या दिशस्तानि चीवरचेतनकान्यानीतानि तत्र स्वयं वा गन्तव्यमाप्तो वा दूतोऽनुप्रेषितव्यः यानि तान्यायुष्मद्भिरेवंनामानं भिक्षुमुद्दिश्य चीवरचेतनकान्यानुप्रेषितानि न तानि तस्य भिक्षोः कंचिदर्थं स्फरन्ति प्राजातत्वायुष्मन्तः स्वमर्थं मा वोर्थः प्रणश्यत्वित्ययं तत्र समयः।

११। यः पुनर्भिक्षुर्नवं कौशेयसंस्तरं कारयेन्नैसर्गिकपायन्तिका।

१२। यः पुनर्भिक्षुः शुद्धकालकानामेडकरोम्नां[5] नवं संस्तरं कारयेन्नैसर्गिकपायन्तिका।

१३। नवं भिक्षुणा संस्तरं कारयता द्वौ भागौ शुद्धकालकानामेडकरोम्नामादातव्यौ तृतीयोऽवदातानां चतुर्थो गोचरिकाणां अनादाय[6]

[1] Ms. समय ; Tib. dus-su.

[2] Ms. सता ; Tib. des-khyod-la.

[3] Ms. दारयितव्यः ; Tib. dran-par-byaḥo.

[4] Ms. दारयतः ; Tib. dran-par-byas-pa-na.

[5] Ms. राम्लां ; Tib. bal.

[6] Ms. नादा ; Tib. bcug-par.



चेद्भिक्षु द्वौ भागौ शुद्धकालकानामेडकरोम्नां तृतीयोऽवदातानां चतुर्थो गोचरिकाणां नवं संस्तरं कारयेन्नैसर्गिकपायन्तिका।

१४। नवं भिक्षुणा संस्तरं कारयता अकामं षड्वर्षाणि कृत्वा धारयितव्यम्। अर्वाक् चेद्भिक्षुः षण्णां वर्षाणां तं पुराणसंस्तरं निसृज्य वा अनिसृज्य वा अन्यं नवं संस्तरं कारयेत् अन्यत्र संघसंमत्या[1] नैसर्गिकपायन्तिका।

१५। नवं [भिक्षु][2]णा निषदनं कारयिता पुराणनिषदनसामन्तकात् सुगतवितस्तिरादातव्या नवस्य दुर्वर्णीकरणाय। अनादाय चेद्भिक्षुः पुराणनिषदनसामन्तकात् सुगतवितस्तिं नवस्य दुर्वर्णीकरणाय, नवं निषदनं परिभुंजीत नैसर्गिकपायन्तिका।

१६। भिक्षोः खल्वध्वप्रतिपन्नस्योत्पद्येरन्नेडकरोमण्याकांक्षता तेन भिक्षुणा प्रतिग्रहीतव्यानि प्रतिगृह्य यावत्त्रियोजनपरमं स्वयं हर्तव्यान्य [सति हारके][3], तत उत्तरि पारेन्नैसर्गिकपायन्तिका।

१७। यः पुनर्भिक्षुरज्ञातिकया भिक्षुण्या एडकरोमाणि धावयेद्रंजयेद्विवटेद्विवटापयेद्वा नैसर्गिकपायन्तिका।

१८। यः पुनर्भिक्षुः स्वहस्तं जातरूपरजतमुद्गृह्णीयादुद्ग्राहनसत्वा नैसर्गिका पायन्तिका।

१९। यः पुनर्भिक्षुर्नानाप्रकारं रुपिकव्यवहारं समापद्येत नैसर्गिका पायन्तिका।

२०। यः पुनर्भिक्षुर्नानाप्रकारं क्रयविक्रयं समापद्येत नैसर्गिका पायन्तिका।

२१। दशाहपरमं भिक्षुणा अतिरेकपात्रं धारयितव्यं, तत उत्तरं परिधारयेन्नैसर्गिका पायन्तिका।

[1] Ms. ०सवृत्यां ; Tib. dge-ḥdun-gyis-gnaṅ-ba-ma-gtogs-te.

[2] Tib. dge-sloṅ-gis.

[3] Tib. khyer-ba-med-na.

२२। यः पुनर्भिक्षुरूनपंचवन्धनेन [पात्रेण][1] पारिभोगिकेनान्यं नवं पात्रं पर्येषेत [कल्याण][2]कामतामुपादायाभिनिष्पन्ने पात्रे नैसर्गिका पायन्तिका। तेन भिक्षुणा तत्पात्रं भिक्षुपर्षद्युपनि[:सृष्टव्यं यः][3] तस्यां भिक्षुपर्षदि पात्रपर्यन्तो भवति। तत्तस्य भिक्षोरनुप्रदातव्यमिदं ते भिक्षोः पात्रं वाधिष्ठातव्यं न विकारयितव्यं सचेन्मन्दं मन्दं परिभोक्तव्यं यावद्भेदनपर्यन्तमुपादाय इत्ययं तत्र समयः।

२३। यः पुनर्भिक्षुः स्वयं याचितेन सूत्रेणाज्ञातिना तन्तुवायेन चीवरं वाययेमिति निष्पन्ने चीवरे नैसर्गिका पायन्तिका।

२४। भिक्षुं खलूद्दिश्याज्ञातिः गृहपतिर्वा गृहपतिपत्नी वाज्ञाततन्तुवायेन चीवरं वाययेत्तत्र चेत्स भिक्षुः पूर्वमप्रवारितः सन् कंचिदेव विकल्पमापद्य तमज्ञातिं तन्तुवायमुपसंक्रम्यैवं वदेत्। यत् खल्वायुष्मांस्तन्तुवाय जानीया इदं चीवरमस्मान्तुद्दिश्य ऊयते साध्वायुष्मंस्तन्तुवाय इदं चीवरं सु[विस्तृ][4]तं च कुरु सुविलिखितं च सुवितक्षितं च स्वाकोटितं चाप्येव वयमायुष्मते तन्तुवायाय कांचिदेव मात्रामुपसंपारिष्यामो यदुत पिण्डपातं वा पिण्डपातमात्रं वा पिण्डपातसंबलं बा चीवरस्याभिनिष्पत्तये, अभिनिष्पन्ने चीवरे नैसर्गिका पायन्तिका।

२५। यः पुनर्भिक्षुर्भिक्षोश्चीवरं दत्त्वा ततः पश्चादभिषिक्तः कुपितश्चण्डीभूतो नात्ममना आच्छिन्द्यादाश्छेदयेद्वा एवं चैनं [वदेत् आनय।][5] भिक्षो चीवरं न ते [भूयो][6] ददामीति। तेन भिक्षुणा तच्चीवरं तच्च शेषमुपनिःसृष्टव्यं भुक्तस्य च नैसर्गिका पायन्तिका।

२६। दशाहमागतयां कार्तिक्यां पौर्णमास्यां भिक्षोरुत्पद्येतात्ययक-

[1] Tib. lhuṅ-bzed.

[2] Tib. bzaṅ-po-ḥdod-paḥi-phyir.

[3] Tib. dbul-bar-byaḥo.........gaṅ.

[4] Tib. zheṅ-che-ba.

[5] Tib. byin-cig-ces-zer-na.

[6] Tib. phyir.



चीवरमाकांक्षता तेन भिक्षुणा प्रतिग्रहीतव्यं प्रतिगृह्य यावच्चीवरदानकालसमयाद्धारयितव्यं तत उत्तरं धारयेन्नैसर्गिका पायन्तिका।

२७। भिक्षवः खलु संबहुलाः आरण्यकेषु शयनासनेषु न वर्षका भवन्ति, साशङ्कसंमतेषु [नानाभ]य[1] संमतेषु सप्रतिभयभैरवसंमतेषु आकांक्षता आरप्यकेन भिक्षुणा त्रयाणां चीवराणामन्यतमान्यतमचीवरमन्तर्गृहे उपनिक्षिप्तव्यं स्यात् खल्वारण्यकस्य भिक्षोस्तद्रूपप्रत्ययो बहिः सीमां ग[न्तुं षडूरा]त्र[2]परममारण्यकेन भिक्षुणा तस्माच्चीवराद्बहिः सीमां विप्रवस्तव्यं तत उत्तरि विप्रवसेन्नैसर्गिका पायन्तिका।

२८। मास्यः शेषो ग्रीष्माणां भिक्षुणा वर्षाशाटीचीवरं पर्यैषितव्यमर्धमासावशिष्टा[3] कृत्वा धारयितव्यम्। अर्वाक् चेद्भिक्षुः मास्यः शेषो ग्रीष्माणां वर्षाशाटीचीवरं पर्यैषेत, ऊर्ध्वमर्धमासावशिष्टावर्षाः कृत्वा धारयेन्नैसर्गिका पायन्तिका।

२९। यः पुनर्भिक्षुर्ज्ञातन् सांघिकं लाभं परिणतमात्मनः पौद्गलिकं परिणामयेन्नैसर्गिका पायन्तिका।

३०। यानि तानि भगवता ग्लानानां भिक्षुणां सांप्रेयाणि प्रतिसेवनीयानि भैषज्यान्याख्यातानि, तद्यथा—सर्पिस्तैलं मधु फाणितं तान्याकांक्षता ग्लानेन भिक्षुणा सप्ताह[4]परमं स्वयमधिष्ठाय सन्निधिकारपरि[भो][5]गेन परिभोक्तव्यानि, तत उत्तरिभुंजीत नैसर्गिका पायन्तिका।

उद्दिष्टा मे आयुष्मन्तस्त्रिंशन्नैसर्गिकपायन्तिका धर्माः। तत्राहमायुष्मन्तः परिपृच्छामि—कच्चित्स्थात्र परिशुद्धाः?

द्विरपि त्रिरपि परिपृच्छामि—कच्चित्स्थात्र परिशुद्धाः?

परिशुद्धा अत्रायुष्मन्तो यस्मात्तूष्णीमेवमेतद् धारयामि।

[1] Tib. ḥjigs-pa-tha-dad-pas.

[2] Tib. ḥgro-dgos-pa......zhag-drug-gi-mthaḥ-tshun-cad-du.

[3] ऊर्द्ध्वं॰ ; Tib. zla-ba-phyed-kyi-bar-du.

[4] Ms. सन्तापा॰ ; Tib. zhag-bdun-bar.

[5] Tib. yoṅs-loṅs-spyod-pas.

## [ नवतिः पायन्तिका धर्माः । ][1]

इमे खल्वायुष्मन्तः नवतिः पायन्तिका धर्मा [अन्व][2]र्धमासं प्रतिमोक्ष-सूत्रोद्देशमागच्छन्ति ।

१ । संप्रजानन्मृषावादात्पायन्तिका ।

२ । ऊनमनुष्यवादात्पायन्तिका ।

३ । भिक्षुपैशुन्यात्पायन्तिका ।

४ । यः पुनर्भिक्षुर्जानन् समग्रेण संघेन यथाधर्ममधिकरणमुपनिक्षिप्तं पुनः कर्मणः खोटयेत्पायन्तिका ।

५ । यः पुनर्भिक्षुर्मातृग्रामस्योत्तरिषट्पंचिकया वाचा धर्मं देशयेद् [अन्यत्र विज्ञपु]रु[3]षात्पायन्तिका ।

६ । यः पुनर्भिक्षुरनुपसंपन्नाय पुद्गलाय पदशो धर्मं वाचयेत्पायन्तिका ।

७ । यः पुनर्भिक्षुरनुपसंपन्नाय पुद्गलाय दुष्ठुलापत्तिमारोचयेदन्यत्र संघसंमत्या[4] पायन्तिका ।

८ । यः पुनर्भिक्षुरनुपसंपन्नाय[5] पुद्गलायोत्तरं मनुष्यधर्ममारोचयेद्भूतात्पायन्तिका ।

९ । यः पुनर्भिक्षुः पूर्वं समनुज्ञो[6] भूत्वा ततः पश्चादेवं वदेद् [यथा][7] संस्तुतिकयायुष्मन्तः सांघिकं लाभं परिणतमात्मनः पौद्गलिकं परिणामयन्तीति पायन्तिका ।

[1] Tib. ltuṅ-byed-kyi-chos-dgu-bcu.

[2] Tib. zla-ba-phyed-phyed-ciṅ.

[3] Tib. rig-paḥi-skyes-pa-na-gtogs-te.

[4] Ms. ०संवृत्या ; Tib. dge-ḥdun-gyis-gnaṅ-ba.

[5] Ms. भिन्तुननुप० ; Tib. bsñen-par-ma-rdsogs-pa.

[6] Ms. सपरत्ने ; Tib. legs-par-ruṅ-bar-byas-nas.

[7] Tib. ḥdi-ltar-shes-por-bya-ste.



१० । यः पुनर्भिक्षुरन्वर्धमासं प्रातिमोक्षसूत्रोद्देशे उद्दिश्यमाने एवं वदेत् किं पुनरेभिरायुष्मन्तः क्षुद्रानुक्षुद्रैः शिक्षापदैः अन्वर्धमासं प्रातिमोक्ष-सूत्रोद्देशैरुच्चार्यमानै[1] र्यानि भिक्षूणां कौकृत्याय संवर्तन्ते आलेखाय विलेखाय विलेठाय विप्रतिसारायेति शिक्षा [पद][2] विलंघ[3] नात्पायन्तिका ।

११ । बीजग्रामभूतग्रामपातनपातापनात्पायन्तिका ।

१२ । अवध्यानक्षिपणात्पायन्तिका ।

१३ । आज्ञाविहेठनात्पायन्तिका ।

१४ । यः पुनर्भिक्षुः सांधिकं मंचं वा पीठं वा वृषिको वा बिंबोपधान-चतुरश्रकं वा अभ्यवकाशे उपनिक्षिप्योपरिक्षिप्य वा अनुद्धृतानुद्धृत्य वा ततो विप्रकामेत्सन्तं भिक्षुमनवलोक्यान्यत्र तद्रूपात् [प्रत्ययात्][4] पायन्तिका ।

१५ । यः पुनर्भिक्षुः सांघिके विहारे तृणसंस्तरं वा पर्णसंस्तरं वा संस्तीर्य संस्तार्य वा अनुद्धृत्यानुद्धार्य वा ततो विप्रकामेत्सन्तं भिक्षुमनवलोक्यान्यत्र तद्रूपात्प्रत्ययात्पायन्तिका ।

१६ । यः पुनर्भिक्षुरभिषक्तः कुपितश्चण्डीभूतो नात्तमना सांधिकाद्विहाराद्भिक्षुं निष्कर्षेन्निष्कार्षापयेद्वा अन्यत्र तद्रूपात्प्रत्ययात्पायन्तिका ।

१७ । यः पुनर्भिक्षुर्जानन् सांघिके विहारे पूर्वोपगतानां भिक्षूणां ततः पश्चादगत्यानुप्रस्कन्द्यासने निषद्यां शय्यां वा कल्पयेत्—यस्य संबाधो भविष्यति स विप्रक्रमिष्यतीति इत्येवं प्रत्ययं कृत्वा पायन्तिका ।

१८ । यः पुनर्भिक्षुर्जानन् सांघिके विहारे उपरि विहायसि कृतायां कुटिकायामाहार्यपादके मञ्चे वा पीठे वा सहसा वलेनाभिपदेद्वाभिनिपद्येत वा पायन्तिका ।

[1] Ms. प्रातिमोत्तसूत्रोद्देश उच्चार्या ; Tib. So-sor-thar-paḥi-mdo-gdon-pa-bton-pa-dag-gis.

[2] Tib. bslab-pa-khyad-du.

[3] Ms. विलगइन ; Tib. gsod-na.

[4] Tib. rkyen.

१९। यः पुनर्भिक्षुर्जानन् सप्राणकेनोदकेन तृणं वा गोमयं वा मृत्तिकां वा सिञ्चेत् सिञ्चयेद्वा पायन्तिका।

२०। महान्तं भिक्षुणा विहारं कारयित्वा यावद्वारक्रोशर्गलस्थानादालोकसंज्ञिना भूमिपरिकर्मोपादाय द्वौ वा त्रयो वा छेदनपर्यायाः सहरिताः अधिष्ठातव्याः तत उत्तरि अधितिष्ठेत्पायन्तिका।

२१। यः पुनर्भिक्षुरसंमतः संघेन भिक्षुणीरववदेत् तद्रूपधर्मसमन्वागमात्पायन्तिका।

२२। संमतश्चापि भिक्षुः संघेन यावत्सूर्यास्तगमनकालसमयात्पायन्किा।

२३। यः पुनर्भिक्षुर्भिक्षुमेव वदेत् आमिषकिञ्चित्कहेतोर्भिक्षवो भिक्षुणीरवदन्तीति पायन्तिका।

२४। यः पुनर्भिक्षुरज्ञातिकायै भिक्षुण्यै[1] चीवरं दद्यादन्यत्र परिवर्तका-[2]त्पायन्तिका।

२५। यः पुनर्भिक्षुरज्ञातिकाया भिक्षुण्याश्चीवरं कुर्यात्पायन्तिका।

२६। यः पुनर्भिक्षुर्भिक्षुणीसार्थेण सार्धमध्वानमार्गं प्रतिपद्येत अतो ग्रामान्तरमपि पायन्तिका। तत्रायं समयः सार्थगमनीयो मार्गो भवति साशङ्कसंमतः सभयसंमतः सप्रतिभयभैरवसंमतोयं तत्र समयः।

२७। यः पुनर्भिक्षुर्भिक्षुणीसार्थेण सार्धं संविधाय एकनावं अभिरोहेत् ऊर्द्धगामिनीं वा अधोगामिनीं वान्यत्र तिर्यग्पारसन्तरणात्पायन्तिका।

२८। यः पुनर्भिक्षुर्मातृगामेन सार्धमेक एकया रहसि प्रतिच्छन्ने आसने निषद्यां कल्पयेत्पायन्तिका।

२९। यः पुनर्भिक्षुर्भिक्षुण्या सार्धमेक एकिकया रहसि प्रतिच्छन्ने तिष्ठेत्पायन्तिका।

३०। यः पुनर्भिक्षुर्जानन् भिक्षुणीपरिपाचितं पिण्डपातं परिभुञ्जीतान्यत्र पूर्वं गृहिसमारंभात्पायन्तिका।

[1] Ms. अज्ञातिकाया भिक्षुण्याः।

[2] Tib. omits.



३१। परंपरभोजनादन्यत्र समयात्पायन्तिका। तत्रायं समयो ग्लानसमयः कर्मसमयः [अध्वानमार्ग][1] समयः चीवरदानकालसमयः।

३२। एकावसथोषितेन भिक्षुणा अग्लानेनैकपिण्डपातः परिभोक्तव्यः ततः उत्तरि परिभुंजीत पायन्तिका।

३३। भिक्षवः खलु संबहुलाः [कुलानि][2] संक्रामयेयुस्तांश्चेच्छ्राद्धा ब्राह्मणगृहपतयस्त्वर्थं प्रवारयेयुर्मण्डैश्चापूपैश्चाकांक्षिभिस्तैर्भिक्षुभिर्द्वौ त्रयो वा पात्रपूराः प्रतिग्रहीतव्याः तत उत्तरि [प्रति][3]गृह्णीयुः पायन्तिका। द्वौ त्रीन्वापात्रपूरान्प्रतिगृह्य तैर्भिक्षुभिर्बहिरारामं गत्वा सन्तो भिक्षवः संविभक्तव्या आत्मना च परिभोक्तव्यमयं तत्र समयः।

३४। यः पुनर्भिक्षुर्भुक्तवान्प्रवारितः अकृतातिरिक्तं खादनीयभोजनीयं खादेद्भुञ्जीत वा पायन्तिका।

३५। यः पुनर्भिक्षुर्जानन् भिक्षुं भुक्तवन्तं प्रवारितं अकृतातिरिक्ते खा[दनीय][4] भोजनीयेनेत्यर्थं प्रवारयदिदमायुष्मन् खाद इदं भुंक्ष्व इत्यास्वादनप्रेक्षी कश्चिदेष भिक्षुरास्वादितो भविष्यति इत्येतदेव प्रत्ययं कृत्वा पायन्तिका।

३६। गण[भोजना][5]दन्यत्र समयात्पायन्तिका। तत्रायं समयः ग्लानसमयः कर्मसमयः [अध्वानमार्ग][6]समयो नावाधिरोहणं महासमाजः श्रमणभक्त[7]समयोयं तत्र समयः।

[1] Tib. lam-dus-so.

[2] Tib. khyim-rnams-su.

[3] Tib. len-na.

[4] Tib. bcaḥ-da-daṅ-bzaḥ-ba.

[5] Tib. ḥdus-shiṅ-za-na.

[6] Tib. lam-dus-so.

[7] Tib. reads dge-sloṅ-gi-zas-dus-te (भिक्षुभक्तसमय).

३७। यः [पुनर्भिक्षु][1]रकाले खादनीवभोजनीयं खादेद्भुञ्जीत वा पायन्तिका।

३८। यः पुनर्भिक्षुः सन्निहितं खादनीयभोजनीयं खादेद्भुञ्जीत वा पायन्तिका।

३९। यः पुनर्भिक्षुरदत्तं [मुखद्वारा][2]हारमाहरेदन्यत्रोदकदन्तकाष्ठा-त्पायन्तिका।

४०। यानि तानि भगवता भिक्षूणां प्रणीतभोजनान्याख्यातानि तद्यथा क्षीरं दधि नवनीतं मत्स्यो मांसं वल्लूरो यः पुन[र्भिक्षुः][3] एवंरूपाणि प्रणीतभोजनानि आत्मार्थमग्लानः परकुलेभ्यो विज्ञाप्य खादेद्भुञ्जीत वा पायन्तिका।

४१। यः पुनर्भिक्षुर्जानन् सप्राणकमुदकं परिभुञ्जीत पायन्तिका।

४२। यः पुनर्भिक्षुर्जानन् सभोजने कुले अनुप्रस्कन्द्यासने निषद्यां कल्पयेत्पायन्तिका।

४३। यः पुनर्भिक्षुर्जानन् सभोजने कुले प्रतिच्छन्ने तिष्ठेत्पायन्तिका।

४४। यः पुनर्भिक्षुरचेलकाय वा अचेलिका[यै वा][4] परिव्राजकाय वा स्वहस्तं खादनीयभोजनीयं दद्यात्पायन्तिका।

४५। यः पुनर्भिक्षुरुद्युक्तां सेनां दर्शनायोपसंक्रामेत् पायन्तिका।

४६। [स्याद्भिक्षो][5]स्तद्रूपः प्रत्ययः उद्युक्तां सेनां दर्शनाय उपसङ्क्रमित्वं द्विरात्रपरमं तेन भिक्षुणा तस्यां सेनायां विप्रवस्तव्यं तत उत्तरि विप्र-[वसेत्पायन्तिका][6]।

[1] Tib. yaṅ-dge-sloṅ.
[2] Tib. kha-nas-mid-paḥi.
[3] Tib. dge-sloṅ.
[4] Tib. gcer-bu-ma.
[5] Tib. dge-sloṅ.........byuṅ-na.
[6] Tib. gnas-na-ltuṅ-byed-do.



४७। [द्विरात्रपरम][1]मपि चेद्भिक्षुस्तस्यां सेनायां विप्रवासं उद्यूषिकां वा गच्छेत्ध्वजाग्रं वा बलाग्रं वा सेनाव्यूहमनीकदर्शनं वा प्रत्यनुभवे-त्पायन्तिका।

४८। [यः पुनर्भिक्षुः][2] कुपितश्चण्डीभूतो नात्तमना भिक्षोः प्रहारं दद्यात्पायन्तिका।

४९। यः पुनर्भिक्षुरभिषक्तः कुपितश्चण्डीभूतो नात्तमना भिक्षोः प्रहार-मुप[दर्शयेत् अन्ततस्तलशक्तिक][3]मपि पायन्तिका।

५०। यः पुनर्भिक्षुर्जानन् भिक्षोः दुष्ठुलामापत्तिं प्रतिच्छादये-त्पायन्तिका।

५१। यः पुनर्भिक्षुर्भिक्षुमेवं वदेत्—एहि आयुष्मन् कुलान्युपसङ्क्रमा-वस्तत्र ते दापयिष्यामि [खादनीयभोज][4]नीयं यावदाप्तं। स तस्य दापयित्वा प्रणीतं खादनीयभोजनीयं यावदाप्तं ततः पश्चादेवं वदेत्—गच्छ त्वामायुष्मन् न मम त्वया सार्धं स्पर्शोऽपितु एकाकिन एव मे स्पर्शो भवति कथायां वा निषद्यायां वा इत्युद्योजनप्रेक्षी कश्चिदेष भिक्षुरुद्योजितो भविष्यतीति एतदेव प्रत्ययं कृत्वा नान्यत्र पायन्तिका।

५२। [यः पुन][5]र्भिक्षुरात्मार्थमग्लानो वितपनप्रेक्षी ज्योतिः समवध-व्यात्समवधापयेद्वा पायन्तिका।

५३। यः पुनर्भिक्षुर्धार्मिकसंधकरणीये भिक्षोश्छन्दं दत्वा पश्चादभिषक्तः [कुपितश्चण्डीभूतो नात्तमना][6] क्षेपधर्ममापद्येत। आहर भिक्षोश्छन्दं न ते ददामीति पायन्तिका।

[1] Tib. zhag-gñis.
[2] Tib. yaṅ-dge-sloṅ-gaṅ.
[3] Tib. brdeg-par-gzas-na-tha-na-thal-mos-kyaṅ. run-ste.
[4] Tib. bcaḥ-ba-daṅ-bzaḥ-ba.
[5] Tib. yaṅ.........gaṅ.
[6] Tib. ḥkhrugs-rñam-par-gyur-te. yid-ma-raṅs-nas.

५४। यः पुनर्भिक्षुरनुपसम्पन्नेन पुद्गलेन सार्धं द्विरात्रादूर्ध्वं सहागार-[शय्यां कल्पयेत्पायन्तिका][1]।

५५। यः पुनर्भिक्षुरेवं वदेत्—तथाहं भगवतो धर्मं देशितमाजानामि यथा ये अन्तरायिका धर्मा उक्ता भगवता ते प्रतिसेव्यमाना नालमन्तरायायेति। [सो भिक्षुर्भिक्षुभि][2]रिदं स्याद्वचनीयो—मा त्वमायुष्मन् एवं वोचस्तथाहं भगवतो धर्मं देशितमाजानामि यथा ये अन्तरायिका धर्मा उक्ता भगवता ते च प्रतिसेव्यमाना [नालमन्तरायाय इति][3]। मा भगवन्तमभ्याचक्षुः न साधु भवति भगवतोऽभ्याख्यानं न च पुनर्भगवान्नेवमाह अनेकपर्यायेण आयुष्मन्नन्तरायिका धर्माः सन्तः अन्तरायिका एवोक्ता भगवता ते च प्रतिसेव्यमाना अलमन्तरायायेति निसृज त्वमायुष्मन् [एवंरूपं पापकं दृष्टिगतं][4]। [सो भिक्षुर्भिक्षुभिरुच्यमानस्तद्वस्तु प्रतिनिसृजेदित्येवं कुशलं, नो चेत्प्रतिनिसृजेद्द्विरपि त्रिरपि समनुयोक्तव्यः समनुशासितव्यस्तस्य प्रतिनिःसर्गाय][5] द्विरपि त्रिरपि ससनुयुज्यमानः समनुशिष्यमानस्तद्वस्तु प्रतिनिसृजेदित्येवं कुशलं, [नो चेत् प्रतिनिसृजेत्, पायन्तिका।][6]

५६। [यः पुनर्भिक्षुर्जानन् तथावादिनं][7] पुद्गलमकृतानुधर्माणामप्रति-

[1] Tib. ñal-na-ltuṅ-byed-do.

[2] Tib. dge-sloṅ-de-la-dge-sloṅ-rnams-kyis.

[3] Tib. bar-du-gcod-par-mi-ḥgyur-te.

[4] Tib. sdig-pa-can-gyi-lta-baḥi-rnams-ḥdi-lta-bu.

[5] Tib. dge-sloṅ-de-la-dge-sloṅ-rnams-kyis-de-skad-bsgo-bana. gal-te-gzhi-de-gtoṅ-na-legs. gal-te-mi-gtoṅ-na-gzhi-de-gtoṅ-bar-bya-baḥi-phyir. lan-gñis-lan-gsum-du-yaṅ-dag-par-bsgo-bar-bya. yaṅ-dag-bstan-par-byaḥo.

[6] Tib. gal-te-mi-gtoṅ-na-ltuṅ-byed-do.

[7] Tib. yaṅ-dge-sloṅ-gaṅ. shes-bzhin-du-de-skad-zer.



निसृष्टे तस्मिन् पापके दृष्टिगते आला [पयेत् संलपेत् तेन सार्धं संवसेत् संभुंजीत सहागारशय्यामपि कल्पयेत्पायन्तिका।][1]

५७। श्रमणोद्देशश्चाप्येवं वदेत्तथाहं भगवतो धर्मं देशितमाजानामि यथा [ये अन्तरायिका धर्मा उक्ता भगवता ते च प्रतिसेव्यमाना नालमन्तरायायेति।][2] सः श्रमणोद्देशो भिक्षुभिरिदं स्याद्वचनीयो मा त्वमायुष्मन् श्रमणोद्देश एवं वोचः [तथाहं भगवतो धर्मं देशितमाजानामि यथा ये अन्तरायिका धर्मा उक्ता][3] भगवता ते च प्रतिसेव्यमाना नालमन्तरायायेति। मा भगवन्तमभ्याचक्षुः न साधु भव[ति भगवतोऽभ्याख्यानं न च पुनर्भगवान्नेवाह अनेकपर्यायेण श्र][4]मणोद्देश अन्तरायिका धर्माः सन्तः अन्तरायिका एवोक्ता भगवता ते च प्रतिसेव्यमाना [अलमन्तरायायेति। निसृज त्वम् श्रमणोद्देश एवंरूपं दृष्टिगतम्।][5] सः श्रमणोद्देशो भिक्षुभिरुच्यमानस्तद्वस्तु चेत् प्रतिनिसृजेदित्येवं कुशलं, [नो चेत्प्रतिनिसृजेद्द्विरपि त्रिरपि समनुयोक्कव्यः समनुशासितव्यस्तम्य वस्तुनः प्रतिनिःसर्गाय, द्विरपि त्रिरपि समनुयुज्यमानः समनुशिष्यमानस्तद्वस्तु

[1] Tib. gtam-ḥdre-bar-byed. phebs-par-smra-bar-byed. kun-tu-gnas-par-byed. kun-tu-loṅ-spyod-par-byed-ciṅ. de-daṅ-lhan-cig-gnas-gcig-tu-ñal-nahaṅ-ltuṅ-byed-do.

[2] Tib. ji-ltar-bcom-ldan-ḥdas-kyis-ḥdod-pa-dag-ni-bar-du-gcod-paḥo-zhes-gsuṅs-pa-gaṅ-yin-pa-de-dag-bstan-kyaṅ-bar-du-gcod-par-mi-ḥgyur-te.

[3] Tib. ji-ltar........ḥdod-pa-dag-ni-bar-du-gcod-paḥo-zhes-gzhuṅs-pa.....de-ltar-bcom-ldan-ḥdas-kyis-chos-bstan-pa. bdag-gis-shes-so.

[4] Tib. bcom-ldan-ḥdas-la-skur-pas-legs-par-mi-ḥgyuro. bcom-ldan-ḥdas-ni-de-skad-mi-gsuṅ-ṅo......dge-tshul......rnam-graṅs-du-mar.

[5] Tib.........bar-du-gcod-par-ḥgyur-gyis. dge-tshul-khyod-lta-baḥi-rnam-pa-ḥdi-lta-bu-ḥdi-thoṅ-shig-ces-bsgo-bar-byaḥo.

प्रतिनिसृजेदित्येवं कुशलं नो चेत् प्रतिनिसृजेत् सः][1] श्रमणोद्देशो भिक्षुभिरिदं स्याद्वचनीयोऽद्याग्रेणायुष्मन् श्रमणोद्देश नासौ भगवांस्तथागतः [अर्हत्सम्यक्संबुद्धस्ते शास्ता। एवंरूपस्यान्यतमान्यतमस्य ब्रह्मचारिणः पृष्ठतः मा समनुबधान][2] यावदप्यन्ये श्रमणोद्देशाः [लभन्ते भिक्षुभिः सार्धं द्विरात्रपरमं सहागारशय्यां सापि ते अद्याग्रेण नास्ति, चर परेण मोह पुरुष नश्यति। यः पुनर्भिक्षुर्जानन् तथानाशितं श्रमणोद्देशमुपस्थापयेद्वा उपलालयेद्वा तेन वा सार्धं सहागारशय्यां कल्पयेत् पायन्तिका।][3]

५८। [नवं खलु भिक्षुणा चीवरं प्रतिलभ्य त्रयाणां दुर्वर्णीकरणानामन्यतमान्यतमः नीलो वा लोहितो वा पीतो वा दुर्वर्णीकरणाय आदातव्योऽनादाय चेद्भिक्षुस्त्रयाणां दुर्वर्णीकरणानामन्यतमान्यतमं दुर्वर्णीकरणम् नीलं वा लोहितं वा पीतं वा नवं चीवरं परिभुंजीत पायन्तिका।][4]

५९। [यः पुनर्भिक्षु रत्नं वा रत्नसंमतं वा स्वहस्तेन उद्गृह्णीयादुद्ग्राहयेद्वान्यत्राध्यारामगताद्वाध्यावासगताद्वा पायन्तिका। भिक्षुणाध्यारा-

[1] Tib. gal-te-mi-gtoṅ-na-gzhi-de-gtoṅ-bar-bya-bahi-phyir. lan-gñis-lan-gsum-du-yaṅ-dag-par-bsgo-bar-bya. yaṅ-dag-par-bstan-par-byaḥo. lan-gñis-lan-gsum-du-yaṅ-dag-par-bsgo. yaṅ-dag-par-bstan-pa-na gzhi-de-gtoṅ-na-de-lta-na-legs. gal-te-mi-gtoṅ-na.........de-la...

[2] Tib. .........dgra-bcom-pa-yaṅ-dag-par-rdsogs-paḥi-sans-rgyas-de-la-ston-paḥo. zhes-ma-zer-cig. tshaṅs-pa-mtshuṅs-par-spyod-mkhas-pa-bla-maḥi-gnas-lta-bu-gaṅ- yaṅ-ruṅ- baḥi- phyi-bzhin-du-yaṅ-ma-ḥgro-shig.

[3] Tib. dge-sloṅ-rnams-daṅ. dge-tshul-lhan-cig-nub-gñis-tshun-chad-gnas-gcig-tu-ñal-du-dbaṅ-ba-gaṅ-yin-de-deṅ-phyin-chad-khyed-la-med-de. gti-mug-can-khyod-bsñil-gyis-gzhan-du-soṅ-shig-ces-bsgo-bar-byaḥo. yaṅ-dge-sloṅ-gaṅ-shes-bzhin-du. ñe-de-ltar-bsñil-baḥi-dge-tshul. ñe-bar-ḥjog-par-byed-dam. ñe-bar-ston-par-byed-dam. de-daṅ-lhan-cig-gnas-cig-tu-ñal-na-ltuṅ-byed-do.

[4] *So-sor-thar-pa*, p. 89, 1.5-9 ; cf. Finot's edition.



मगतं वाध्यावासगतं वा रत्नं वा रत्नसंमतं वा उद्ग्रहीतव्यं यस्येदं भविष्यति सो हरिष्यति इत्येवं मनसिकृत्वा। अयं तत्र समयः।][1]

६०। [भगवता देशितमन्वर्धमासं स्नायादन्यत्र समयात् तदतिक्रमात्पायन्तिका।. अयं तत्र समयः—अध्यर्धो मासः शेषो ग्रीष्माणां पूर्वो मासो वर्षाणां इत्येते अर्धतृतीयमासा उष्णसमयोऽवशिष्टं ग्लानसमयः कर्मसमयो वृष्टिसमयो वातवृष्टिसयोऽयं तत्र समयः।][2]

६१। [यः पुनर्भिक्षुः संचिन्त्य तिर्यग्योनिगतं प्राणिनं जीवितात् व्यपरोपयेत्पायन्तिका।][3]

६२। [यः पुनर्भिक्षुः संचिन्त्य कश्चिदस्य भिक्षोर्मुहूर्तमपि तावदफाषं स्पर्शं भवेदेतदेव प्रत्ययं कृत्वा भिक्षोकौकृत्यमुपसंहरेत्पायन्तिका।][4]

६३। [अङ्गुलिप्रतोदनात्पायन्तिका।][5]

६४। [उदकहर्षणात्पायन्तिका।][6]

६५। [यः पुनर्भिक्षुर्मातृग्रामेण सार्धं सहागारशय्यां कल्पयेत्पायन्तिका।][7]

६६। [यः पुनर्भिक्षुर्भिक्षुं भीषयेत् भीषापयेद्वान्ततो हास्यप्रेक्ष्यमपि पायन्तिका।][8]

६७। [यः पुनर्भिक्षुर्भिक्षोर्वा भिक्षुण्या वा शिक्षमाणाया वा श्रामणेरस्य वा श्रामणेरिकाया वा पात्रं वा चीवरं वा उपानहं वा सूचीघरं

[1] *So-so-thar-pa*, p. 89, l. 10-I7 ; cf. Finot's edition.

[2] *Ibid.*, p. 89, 18—p. 90, l. 3 ; cf. *op. cit.*

[3] *Ibid.*, p. 90, l. 9-10 ; cf. *op. cit.*

[4] *Ibid.*, p. 90, l. 11-13 ; cf. *op. cit.*

[5] *Ibid.*, p. 90, l. 14 ; cf. *op. cit.*

[6] *Ibid.*, p. 90, l. 15 ; cf. *op. cit.*

[7] *Ibid.*, p. 90, l. 16-17 ; cf. *op. cit.*

[8] *Ibid.*, p. 90, l. 18-19 ; cf. *op. cit.*,

वा कायबन्धनं वान्यतमान्यतमं वा जीवितपरिष्कारमुपनिदध्यादुपनिधापयेत्तद्रूपप्रत्ययादन्यत्र पायन्तिका ।][1]

६८ । [यः पुनर्भिक्षुर्भिक्षोश्चीवरं विकल्प्य ततः पश्चादप्रत्युद्धार्य परिभुंजीत पायन्तिका ।][2]

६९ । [यः पुनर्भिक्षुः कुपितो नात्तमना परिशुद्धं अनापत्तिकं भिक्षुं अमूलकेन संघावशेषेण धर्मेणानुध्वंसयेत्पायन्तिका ।][3]

७० । [यः पुनर्भिक्षुरपुरुषया स्त्रिया सार्धं संविधायाध्वमार्गं प्रतिपद्येतान्ततो ग्रामान्तरमपि पायन्तिका ।][4]

७१ । [यः पुनर्भिक्षुः स्तेयसार्थेन सार्धं संविधायाध्वमार्गं प्रतिपद्येतान्ततो ग्रामान्तरमपि पायन्तिका ।][5]

७२ । [यः पुनर्भिक्षुरूनविंशवर्षं पुद्गलं भिक्षुभावायोपसंपादयेत पायन्तिका । स च पुद्गलोनुपसंपन्नस्ते च भिक्षवो गर्ह्या अयं तत्र समयः ।][6]

७३ । [यः पुनर्भिक्षुः स्वहस्तेन पृथिवीं खन्यात् खानयेद्वा पायन्तिका ।][7]

७४ । [चातुर्मासिकप्रवारणा भिक्षुणा स्वीकर्तया ततोत्तरं पायन्तिका । प्रप्येकप्रवारणाया पुनः पुनः प्रवारणायाः कालिकप्रवारणाया नित्यप्रवारणाया अन्यत्र अयं तत्र समयः ।][8]

७५ । [यः पुनर्भिक्षुर्भिक्षुभिरायुष्मता त्वया शिक्षायां शिक्षितव्यमिति

[1] *So-sor-thar-pa*, p. 91, l. 5 ; cf. Finot's edition.

[2] *Ibid.*, p. 91, l. 6-7 ; cf. *op. cit.*

[3] *Ibid.*, p. 91, l. 8-10 ; cf. *op.* cit.

[4] *Ibid.*, p. 91, l. 11-12 ; cf. *op. cit.*

[5] *Ibid.*, p. 91, l. 18-19 ; cf. *op. cit.*

[6] *Ibid.*, p. 92, l. 1-4 ; cf. *op. cit.*

[7] *Ibid.*, p. 92, l. 5-6 ; cf. *op. cit.*

[8] *Ibid.*, p. 92, l. 7-11 ; cf. *op. cit.*



उच्यमान एवं वदेन्नाहं तव बालस्य मूढस्य दुष्प्रज्ञस्य वचनानि शिक्षिष्यामि यावन्नाहं भिक्षून् प्रक्ष्यामि सूत्रधरान् विनयधरान् मातृकधराननिति पायन्तिका । सर्वज्ञताकामेन भिक्षुणा शिक्षायां शिक्षितव्यं भिक्षवः प्रष्टव्या सूत्रधरा विनयधरा मातृकधरा अयं तत्र समयः ।][1]

७६ । [यः पुनर्भिक्षुर्भिक्षूणां कलहजातानां भण्डनजातानां भेदगृहीतानां विवादमापन्नानां तूष्णीमूपश्रुतिकस्तिष्ठेत् यदेते भिक्षवो वक्ष्यन्ति तदहं धारयिष्यामीति एतदेव प्रत्ययं कृत्वा पायन्तिका ।][2]

७७ । [यः पुनर्भिक्षुः संघे धार्मिकायां विनिश्चयकथायां वर्तमानायां आसनात् तूष्णीमुत्थाय प्रक्रमेत् सन्तं भिक्षुमनवपृच्छयान्यत्र तद्रूपप्रत्ययात्पायन्तिका ।][3]

७८ । [अनादरवृत्तात्पायन्तिका ।][4]

७९ । [सुरामैरेयमद्यपानात्पायन्तिका ।][5]

८० । [यः पुनर्भिक्षुरकाले ग्रामं प्रविशेत् सन्तं भिक्षुमनवपृच्छ्य अन्यत्र तद्रूपात्प्रत्ययात्पायन्तिका ।][6]

८१ । [यः पुनर्भिक्षुः सभक्तः कुले निमन्त्रितः पूर्वभक्तं पश्चाद्भक्तं कुलेषु चारित्रमापद्येत सन्तं कुलं अप्रतिसंवेदितोऽन्यत्र तद्रूपात्प्रत्ययात्पायान्तिका ।][7]

८२ । [यः पुनर्भिक्षुरनिर्गतायां रजन्यां अनुद्गतेऽरुणे अनिर्हृतेषु रत्नेषु

[1] *So-sor-thar-pa*, p. 92, l. 12-20 ; cf. Finot's edition.

[2] *Ibid.*, p. 93, l. 1-5 ; cf. *op. cit.*

[3] *Ibid.*, p. 93, l. 6-9 ; cf. *op. cit.*

[4] *Ibid.*, p. 93, l. 10 ; cf. *op. cit.*

[5] *Ibid.*, p. 93, l. 11-12 ; cf. *op. cit.*

[6] *Ibid.*, p. 93, l. 13-15 ; cf. *op. cit.*

[7] *Ibid.*, p. 94, l. 1-3 ; cf. *op. cit.*

रत्नसंमतेषु वा राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य इन्द्रकीलं वा इन्द्रकीलसामन्तं वा समतिक्रमेदन्यत्र तद्रूपात्प्रत्ययात्पायन्तिका ।][1]

८३ । [यः पुनर्भिक्षुरन्वर्धमासं प्रातिमोक्षसूत्रे उद्दिश्यमाने एवं वदेदिदानीमहं जानामि आयुष्मन्तोऽयमपि किल धर्मो सूत्रागतो सूत्रपर्यायापन्नोद्देश्यमागच्छतीति, तत्रायुष्मन्तं चेद्भिक्षवो जानीयुः निषण्णपूर्वं आयुष्मता द्वत्रिकृत्वं पोषधे, कः पुनर्वादो भूय इति, आयुष्मतोऽज्ञानतः न मुक्तिः यत आपत्तिमापन्नो ततो यथाधर्मं कारयितव्य उत्तरं च कौकृत्यमारोपयितव्यं—आयुष्मन् ते अलाभोऽलब्धः दुर्लब्धो न सुलब्धो यत्त्वं अन्वर्धमासं प्रातिमोक्षसूत्रोद्दिश्यमाने न सत्कृत्य शृणोषि न गुरुकरोषि नार्थिकरोषि न मनसिकरोषि एकाग्रचित्तेनावहितश्रोत्रेण न शृणोषि सर्वचित्तसंकल्पैरपि न शृणोषि । आयुष्मन् तत्र कौकृत्यात्पायन्तिका ।][2]

८४ । [यः पुनर्भिक्षुरस्थिमयं वा विषाणमयं वा सूचिधरं कारयेत् तद्भेदनात्पायन्तिका ।][3]

८५ । [भिक्षुणा संघस्य पीठं वा मञ्चं कारयता सुगताष्टङ्गुलिप्रमाणाः पादाः कारयितव्या अन्यत्र अधस्तात् अटन्याः तत उत्तरं कारयेच्छेदनात्पायन्तिका ।][4]

८६ । [यः पुनर्भिक्षुस्तूलसंस्तृतं पीठं वा मञ्चं अवनहेदवनाहयेद्वा उद्दलनात्पायन्तिका ।][5]

८७ । [निषीदनं भिक्षुणा कारयता प्रामाणिकं कारयितव्यं तत्रेदं प्रमाणं—दीर्घतो वितस्ती द्वे सुगतवितस्त्यास्तिर्यक् सार्धवितस्तिर्दशानाश्च वितस्तिस्तत उत्तरं कारयेत्भेदनात्पायन्तिका ।][6]

[1] *So-sor-tbar-pa*, p. 94, l. 4-7 ; cf. Finot's edition.

[2] *Ibid.*, p. 94, l. 8-20 and p. 95, l. 1-2 ; cf. *op. cit.*

[3] *Ibid.*, p. 95, l. 3-4 ; cf. *op. cit.*

[4] *Ibid.*, p. 95, l. 4-8 ; cf. *op. cit.*

[5] *Ibid.*, p. 95, l. 9-10 ; cf. *op. cit.*

[6] *Ibid.*, p. 95, l. 11-14 ; cf. *op. cit.*



८८ । [कण्डुप्रतिछादनं भिक्षुणा कारयता प्रामाणिकं कारयितव्यं तत्रेदं प्रमाणं—दीर्घतश्चतस्रो वितस्तयो सुगतवितस्त्यस्तिर्यग् द्वे तत उत्तरं कारयेच्छेदनात्पायन्तिका ।][1]

८९ । [वर्षाशाटीचीवरं भिक्षुणा कारयता प्रामाणिकं कारयितव्यं तत्रेदं प्रमाणं—दीर्घतः षट् वितस्तयो सुगतवितस्त्यस्तिर्यक् सार्धे द्वे तत उत्तरं कारयेच्छेदनात्पायन्तिका ।][2]

९० । [यः पुनर्भिक्षुः सुगतचीवरप्रमाणं चीवरं कारयेदुत्तरं वा सुगतचीवरात्पायन्तिका । तत्रेदं सुगतचीवरप्रमाणं दीर्घतो नव वितस्तयः तिर्यक् षट् वितस्तयः इदं सुगतचीवरप्रमाणम् ।][3]

[उद्दिष्टा मयायुष्मन्तो नवतिः पायन्तिका धर्माः । तत्राहमायुष्मन्तः पृच्छामि—कच्चित्स्थात्र परिशुद्धाः ?

परिशुद्धा अत्रायुष्मन्तो यस्मात्तूष्णीमेवाहं धारयामि ।][4]

[1] *So-sor-thar-pa*, p. 95, l. 15-18 ; cf. Finot's edition.

[2] *Ibid.*, p. 95, l. 19-20 and p. 96. l. 1-2 ; cf. *op. cit.*

[3] *Ibid.*,, p. 96, l. 3-8 ; cf. *op. cit.*

[4] *Ibid.*, p. 96, l. 9-13 ; cf. *op. cit.*

[ चत्वारः प्रतिदेशनीया धर्माः । ][1]

[ इमे खल्वायुष्मन्तः चत्वारः प्रतिदेशनीया धर्मा अन्वर्धमासम् प्रातिमोक्षसूत्रोद्देशमागच्छन्ति । ][2]

१ । [ यः पुनर्भिक्षुरन्तगृहं पिण्डाय चरन्त्या अज्ञात्या भिक्षुण्याः सन्तिकात्सहस्तं खादनीयभोजनीयं प्रतिगृह्य खादेत् वा भुञ्जीत वा तेन भिक्षुणा बहिरारामं गत्वा भिक्षोरन्तिके प्रतिदेशयितव्यं गर्ह्यमस्मया-युष्मन्तः स्थानमापन्नोऽसात्म्यं प्रतिदेशनीयं तं धर्मं प्रतिदेशयामीति अयमपि धर्मः प्रतिदेशनीयः । ][3]

२ । [ संबहुला भिक्षवः कुलेषु निमन्त्रिता भुञ्जीरन् तत्र चेद् भिक्षुणी व्यपदेशमाना स्थिता स्यादिह भोजनीयं दत्त ओदनं दत्त सूपं दत्तेति, सा भिक्षुणी भिक्षुभिरेवं स्याद्वचनीया आगमयस्व भगिनि मुहूर्तं यावद्भिक्षवो भुञ्जते । एकेनापि भिक्षुणा चेत् तां भिक्षुणीमपसारयितुं न वचनीयं, सर्वैर्भिक्षुभिः बहिरारामं गत्वा भिक्षूणामन्तिके प्रतिदेशितव्यं गर्ह्यं ][4] मायुष्मन्तः स्थानमापन्ना असात्म्यं प्रतिदेशनीयं तं धर्मं प्रतिदेशयाम इति, अयमपि धर्मः प्रतिदेशनीयः ।

३ । यानि तानि कुलानि शिक्षासंवृतिसंमतानि यः पुनर्भिक्षुस्तद्रूपेषु

[1] Tib. so-sor-bshags par-bya-baḥi-chos-bzhi.

[2] *So-sor-thar-pa*, p. 97, l. I-2 ; cf. Finot's edition.

[3] *Ibid.*, p. 97, l. 3-9 ; cf. *op. cit.*

[4] Tib. dge-sloṅ-rab-tu-maṅ-po-khyim-rnams-su- ḥgron- du-bos- nas- za- baḥi- tshe- na. gal- te- dge- sloṅ- ma- zhig-ḥdi-la-ni-bcaḥ- ba- byin- cig. ḥdi-la-ḥbras-can-byin-cig. ḥdi-la-ni-sran-tshod-byin- cig. ḥdi- la- ni-yaṅ- byin- cig- ces-sgo-zhiṅ-ḥdug-na. dge- sloṅ- ma- de- la- dge- sloṅ- rnams- kyis- ḥdi-skad-ces-sriṅ-mo-khyod- dge- sloṅ-rnams-zan-za-baḥi-bar-du-re-shig-sdod-cig-ces-bsgo-bar-byaḥo. gal-te-dge-sloṅ-gcig-gis-kyaṅ-dge-sloṅ-ma-de-la- de- skad- smra- ba- spobas- na. dge- sloṅ- de-dag-thams-cad-kyis-phyi-rol-kun-dgaḥ-ra-bar-doṅ-ste. dge-sloṅ-rnams-la-tshe-daṅ-ldan-pa-dag-bdag-cag-la-smad-paḥi-gnas-mi-rigs-pa.



सङ्घस्य शैक्षेषु कुलेषु शिक्षासंवृतिसंमतेषु पुर्वमप्रवारितस्य खादनीयभोजनीयं प्रतिगृह्य[1] खादेत्भुञ्जीत वा तेन भिक्षुणा बहिरारामं गत्वा भिक्षूणामन्तिके प्रतिदेशनीयं तत्स्थानमापन्नोऽसात्म्यं[2] प्रतिदेशनीयं तं धर्मं प्रतिदेशयामीति, अयमपि धर्मः प्रतिदेशनीयः ।

४ । यानि तानि कानि शयनासनानि साशङ्कसंमतानि सभयसं-मतानि सप्रतिभयभैरवसंमतानि यः पुनर्भिक्षुस्तद्रूपेषु संघस्यारण्यकेषु शयनेषु साशंकसंमतेषु सभयसंमतेषु सप्रतिभयभैरवसंमतेषु पूर्वमप्रतिसं-विद्यते वने बहिरारामस्य खादनीयभोजनीयं खादेत्भुञ्जीत वा तेन भिक्षुणा भिक्षूणामन्तिके प्रतिदेशयितव्यं गर्ह्यमस्म्यायुष्मन्तः स्थानामापन्नोऽसात्म्यं प्रतिदेशनीयं तं धर्मं प्रतिदेशयामीति, अयमपि धर्मः प्रतिदेशनीयः ।

उद्दिष्टा मयायुष्मन्तश्चत्वारः प्रतिदेशनीया धर्माः । तत्राऽहमायुष्मन्तः परिपृच्छामि—कच्चित्स्थात्र परिशुद्धाः ?

द्विरपि त्रिरपि—कच्चित्स्थात्र परिशुद्धाः ?

परिशुद्धा आयुष्मन्तो यस्मात्तूष्णीमेवमेतद् धारयामि ।

[1] Tib. adds raṅ-gi-lag-gis ( स्वहस्तेन ) immediately before it.

[2] Tib. adds smad-paḥi ( गर्ह्यं ) immediately before it.

[ संबहुलाः शैक्षा धर्माः । ][1]

इमे खल्वायुष्मन्तः संबहुलाः शैक्षा धर्मा अन्वर्धमासं प्रातिमोक्ष-सूत्रोद्देशमा[गच्छन्ति । ][2]

१ । परिमण्डलं निवासनं निवासयिष्याम इति शिक्षा करणीया ।
२ । नात्युत्कृष्टं निवासनं निवासयिष्याम इति शिक्षा करणीया ।
३ । नात्यवकृष्टं निवासनं निवासयिष्याम इति शिक्षा करणीया ।
४ । न हस्तिशुण्डकं निवासनं निवासयिष्याम इति शिक्षा करणीया ।
५ । न ताल[पत्रं][3] निवासनं निवासयिष्याम इति शिक्षा करणीया ।
६ । [न कुल्माषपिण्डकं निवासनं निवासयिष्याम इति शिक्षा करणीया ।][4]
७ । न नागशीर्षकं निवासनं निवासयिष्याम इति शिक्षा करणीया ।
८ । परिमण्डलं चीवरं निवासयिष्याम इति शिक्षा करणीया ।
९ । [नात्युत्कृष्टं चीवरं निवासयिष्याम इति शिक्षा करणीया ।][5]
१० । [नोत्युपकृष्टं चीवरं निवासयिष्याम इति शिक्षा करणीया ।][6]
११ । सुसंवृता अन्तर्गृहे गमिष्याम इति शिक्षा करणीया ।
१२ । सुप्रतिच्छन्ना अन्तर्गृहे गमिष्याम इति शिक्षा करणीया ।
१३ । अल्पशब्दा अन्तर्गृहे गमिष्याम इति शिक्षा करणीया ।
१४ । अनुत्क्षिप्तचक्षुषोन्तर्गृहे गमिष्याम इति शिक्षा करणीया ।
१५ । युगमात्रदर्शिनोन्तर्गृहे गमिष्याम इति शिक्षा करणीया ।
१६ । नोद्गुण्ठिकया अन्तर्गृहं गमिष्याम इति शिक्षा करणीया ।

1 Tib. bslab-paḥi-chos-maṅ-po.
2 Tib. .........ḥbyuṅ-ṅo.
3 Tib. lo-ma.
4 Tib. ḥbruhi-phur-ma-ltar-ma-yin-pa-daṅ.
5 Tib. chos-gos-ha-caṅ-rtseṅs-pa-ma-yin-pa-daṅ.
6 Tib. ha- caṅ- ḥjol- ba- ma- yin- par- bgo- bar- bslab- par-byaḥo.



१७ । नोत्कृष्टिकया अन्तर्गृहं गमिष्याम इति शिक्षा करणीया ।
१८ । नोत्सक्तिकया अन्तर्गृहं गमिष्याम इति शिक्षा करणीया ।
१९ । न व्यस्तिकया अन्तर्गृहं गमिष्याम इति शिक्षा करणीया ।
२० । न पर्यस्तिकया अन्तर्गृहं गमिष्याम इति शिक्षा करणीया ।
२१ । नोलम्बिकया अन्तर्गृहं गमिष्याम इति शिक्षा करणीया ।
२२ । नोद्दंम्बिकया अन्तर्गृहं गमिष्याम इति शिक्षा करणीया ।
२३ । नोत्कुटकया अन्तर्गृहं गमिष्याम इति शिक्षा करणीया ।
२४ । न निकटोत्कुटकया अन्तर्गृहं गमिष्याम इति शिक्षा करणीया ।
२५ । न स्कम्बाकृता अन्तर्गृहं गमिष्याम इति शिक्षा करणीया ।
२६ । न कायप्रचालकं अन्तर्गृहं गमिष्याम इति शिक्षा करणीया ।
२७ । न बाहुप्रचालकं अन्तर्गृहं गमिष्याम इति शिक्षा करणीया ।
२८ । न शीर्षप्रचालकं अन्तर्गृहं गमिष्याम इति शिक्षा करणीया ।
२९ । नांसोत्फतिकया[1] अन्तर्गृहं गमिष्याम इति शिक्षा करणीया ।
३० । न हस्तसंलग्निकया अन्तर्गृहं गमिष्याम इति शिक्षा करणीया ।
३१ । नानुज्ञाता अन्तर्गृहे आसने निषत्स्याम इति शिक्षा करणीया ।
३२ । नाप्रतिवेक्ष्यासनं अन्तर्गृहे आसने निषत्स्याम इति शिक्षा करणीया ।

३३ । न सर्वकायं समवधायान्तर्गृहे आसने निषत्स्याम इति शिक्षा करणीया ।

३४ । न पादे पादमाधायान्तर्गृहे आसने निषत्स्याम इति शिक्षा करणीया ।

३५ । न गुल्फे गुल्फमाधायान्तर्गृहे आसने निषत्स्याम इति शिक्षा करणीया ।

३६ । न सक्थनि सक्थि आदायान्तर्गृहे आसने निषत्स्याम इति शिक्षा करणीया ।

1 Ms. नासो॰, Tib. phag-pa-mi-sprad-pa-daṅ.

३७। न संक्षिप्य पादौ अन्तर्गृहे आसने निषत्स्याम इति शिक्षा करणीया।

३८। न विक्षिप्य पादौ अन्तर्गृहे आसने निषत्स्याम इति शिक्षा करणीया।

३९। न व्यतङ्गिकया अन्तर्गृहे आसने निषत्स्याम इति शिक्षा करणीया।

४०। सत्कृत्य पिण्डपातं प्रतिग्रहीष्याम इति शिक्षा करणीया।

४१। समतीर्थिकं पिण्डपातं प्रतिग्रहीष्याम इति शिक्षा करणीया।

४२। समसूपिकं पिण्डपातं प्रतिग्रहीष्याम इति शिक्षा करणीया।

४३। सावदानं पिण्डपातं प्रतिग्रहीष्याम इति शिक्षा करणीया।

४४। न अनागते खादनीयभोजनीये पात्रमुपनामयिष्याम इति शिक्षा करणीया।

४५। नोदनेन सूपिकं प्रतिच्छादयिष्याम इति शिक्षा करणीया।

४६। सूपिकेन वा ओदनं भूयस्कामतामुपादाय इति शिक्षा करणीया।

४७। नोपरि खादनीयभोजनीयस्य पात्रम् धारयिष्याम इति शिक्षा करणीया।

४८। सत्कृत्य पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।

४९। नातिखुण्डकं पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।

५०। नातिमहान्तं पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।

५१। परिमण्डलं आलोपमालोपयिष्याम इति शिक्षा करणीया।

५२। न अनागते आलोपे मुखद्वारं विवरिष्याम इति शिक्षा करणीया।

५३। न सालोपेन मुखेन वाचं प्रव्याहरिष्याम इति शिक्षा करणीया।

४४। न चुचुत्कारकं पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।

५५। न शुशुत्कारकं पिण्डपातं परिभाक्ष्याम इति शिक्षा करणीया।

५६। न थुत्युत्कारकं पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।

५७। न फुफ्फुत्कारकं पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।

५८। न जिह्वानिश्चारकं पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।



५९। न सिक्थपृथक्कारकं पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।

६०। नावरणकारकं पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।

६१। न गल्लापहारकं पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।

६२। जिह्वास्फोटकं पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।

६३। न कवलच्छेदकं पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।

६४। न हस्तावलेहकं पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।

६५। न पात्रावलेहकं पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।

६६। न हस्तसंधूनकं पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।

६७। न पात्रसंधूनकं पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।

६८। न स्तूपाकृतिमवगृह्य पिण्डपातं परिभोक्ष्याम इति शिक्षा करणीया।

६९। नावध्यानप्रेक्षिणोऽन्तरिकस्य भिक्षोः पात्रमवलोकयिष्याम इति शिक्षा करणीया।

७०। न सामिषेण पाणिना उदकस्थालकं ग्रहीस्याम इति शिक्षा करणीया।

७१। न सामिषेणोदकेनान्तरिकं भिक्षुं सेक्ष्याम इति शिक्षा करणीया।

७२। न सामिषमुदकमन्तर्गृहे छोरयिष्याम इति शिक्षा करणीया।

७३। न पात्रेण विघसंश्छोरयिष्याम इति शिक्षा करणीया।

७४। अनास्तीर्णे पृथिवीप्रदेशे पात्रं स्थापयिष्याम इति शिक्षा करणीया।

७५। न तटे न प्रपाते न प्राग्भारे पात्रं स्थापयिष्याम इति शिक्षा करणीया।

७६। नोत्थिताः पात्रं निर्मादयिष्याम इति शिक्षा करणीया।

७७। न तटे न प्रपाते न प्राग्भारे पात्रं निर्मादयिष्याम इति शिक्षा करणीया।

७८। न नद्याः कार्यकारिण्या प्रतिस्रोतः पात्रोदकं ग्रहीष्याम इति शिक्षा करणीया।

७९। न उत्थिता निषण्णायाग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

८०। न निषण्णा निपन्नायाग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

८१। न नीचतरके आसने निषण्णा उच्चतरके आसने निषण्णायाग्लानाय देशयिष्याम इति शिक्षा करणीया।

८२। न पृष्ठतो गच्छन्तः पुरतो गच्छते अग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

८३। नोन्मार्गेण गच्छन्तो मार्गेण गच्छते अग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

८४। नोद्गुण्ठिकाकृतायाग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

८५। नोत्कृष्टिकाकृतायाग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

८६। नोत्सक्तिकाकृतायाग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

८७। न व्यस्तिकाकृतायाग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

८८। न पर्यस्तिकाकृतायाग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

८९। नोष्णीषशिरसे अग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

९०। न खोलाशिरसे अग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

९१। न मौलिशिरसे अग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

९२। न मालाशिरसे अग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

९३। न वेष्टितशिरसे अग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।



९४। न हस्त्यारूढाय अग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

९५। न अश्वारूढाय अग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

९६। न शिविकारूढाय अग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

९७। न यानारूढाय अग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

९८। न पादुकारूढाय अग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

९९। न दण्डपाणये अग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

१००। न छत्रपाणये अग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

१०१। न शस्त्रपाणये अग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

१०२। न खड्गपाणये अग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

१०३। नायुधपाणये अग्लानाय धर्मं देशयिष्याय इति शिक्षा करणीया।

१०४। सन्नद्धायाग्लानाय धर्मं देशयिष्याम इति शिक्षा करणीया।

१०५। नाग्लाना उत्थिता उच्चारप्रस्रावं करिष्याम इति शिक्षा करणीया।

१०६। नाग्लानाः उदके उच्चारप्रस्रावं खेटं सिंघाणकं वान्तं विरिक्तं छोरयिष्याम इति शिक्षा करणीया।

१०७। नाग्लानाः सहरिते पृथिवीप्रदेशे उच्चारप्रस्रावं खेटं सिंघाणकं वान्तं विरिक्तं छोरयिष्याम इति शिक्षा करणीया।

१०८। नासाधिकपौरुषं वृक्षमधिरोक्ष्यामोन्यत्रापद इति शिक्षा करणीया।

उद्दिष्टा मे आयुष्मन्तो संबहुला [शैक्षा][1] धर्माः। तत्राहमायुस्मन्तः परिपृच्छामि—कच्चित्स्थात्र परिशुद्धाः ?

द्विरपि त्रिरपि परिपृच्छामि—कच्चित्स्थात्र परिशुद्धाः ?

परिशुद्धा आयुष्मन्तो यस्मात्तूष्णीमेवमेतद् धारयामि।

[1] Tib. bslab-paḥi.

[ सप्त अधिकरणशमथाः धर्माः । ][1]

इमे खल्वायुष्मन्तः सप्ताधिकरणशमथाः धर्मा अन्वर्धमासं प्रातिमोक्षसूत्रोद्देशमागच्छन्ति ।

संमुखविनयार्हाय संमुखविनयं दास्यामः। स्मृतिविनयार्हाय स्मृतिविनयं दास्यामः । अमूढविनयार्हाय अमूढविनयं दास्यामः । यद्भूयेषिपार्हाय यद्भूयेषियं दास्यामः । तत्स्वभावेषियार्हाय तत्स्वभावेषियं दास्यामः । तृणप्रस्तारकार्हाय तृणप्रस्तारकं दास्यामः । प्रतिज्ञाकारकार्हाय प्रतिज्ञां दास्यामः ।

उत्पन्नोत्पन्नान्यधिकरणान्येभिः सप्तभिरधिकरणशमथैर्धर्मैर्दापयिष्यामः शमयिष्यामो व्युपशमयिष्यामो धर्मविनयेन शास्तुः शासनेन ।

उद्दिष्टा मे आयुष्मन्तः सप्ताधिकरणशमथा धर्माः ।

तत्राहमायुष्मन्तः परिपृच्छामि—कच्चित्स्थात्र परिशुद्धाः ?

द्विरपि त्रिरपि परिपृच्छामि—कच्चित्स्थात्र परिशुद्धाः ?

परिशुद्धा आयुष्मन्तो यस्मात्तूष्णीमेवमेतद् धारयामि ।

क्षान्तिः परमं तपस्तितिक्षा
निर्वाणं परमं वदन्ति बुद्धाः ।
न हि प्रव्रजितः परोपतापी
श्रमणो भवति परान्विहेठयानः[2] ।।१।।
चक्षुष्मान्विषमाणीव[3] विद्यमाने पराक्रमे ।
पण्डितो जीवलोकेस्मिन् पापानि परिवर्जयेत् ।।२।।
अनुपवादोऽनुपघातः प्रातिमोक्षे च संवरः ।
मात्रज्ञता च भक्तेस्मिन् प्रान्तं च शायनासनं
अधिचित्ते समायोग एतद्बुद्धानुशासनम्[4] ।।३।।

[1] Tib. rtsod-pa-zhi-bar-bya-baḥi-chos-bdun.
[2] Cf. *Dhammapada*, Buddhavagga, verse 6.
[3] Ms. ॰न्विष॰, Tib. ñam-ṅa-ba.
[4] cf. *Dhammapada*, Buddhavagga, verse 7.



यथाहि भ्रमरः पुष्पाद्वर्णगन्धावलोठयन् ।
द्रयते रसमादाय एवं ग्रामे मुनिश्चरेत्[1] ।।४।।
न परेषां विलोमानि न परेषां कृताकृतम् ।
आत्मनस्तु समीक्षेत समानि विषमाणि च[2] ।।५।।
अधिचेतसि मा प्रामोद्यतो मुनिनो मौनिपदेषु शिक्षिताः ।
शोका न भवन्ति तायिनः उपशान्तस्य सदा स्मृतिमतः ।।६।।
ददतः पुण्यं प्रवर्धते वैरं संयमतो न चीयते ।
कुशली प्रजहाति पापकं क्लेशानां क्षयितस्तु निर्वृतिः ।।७।।
सर्वपापस्याकरणं कुशलस्योपसंपदा ।
स्वचित्तपरिदमनमेतद्बुद्धानुशासनम्[3] ।।८।।
कायेन संवरः साधुः साधुः वाचा च संवरः ।
मनसा संवरः साधुः साधुः सर्वत्र संवरः ।
सर्वत्र संवृतो भिक्षुः सर्वदुःखात्प्रमुच्यते[4] ।।९।।
वाचानुरक्षी मनसा सुसंवृतः कायेन चैवाकुशलं न कुर्यात् ।
एतत्त्रिकर्मपथान्विशोध्य नारागयेन्मार्गमृषिप्रवेदितम् ।।१०।।
बुद्धो विपश्यी च शिखी च विश्वभू
क्रकुत्सन्दः कनकमुनिश्च काश्यपः ।
अनन्तरः शाक्यमुनिश्च गौतमो
देवातिदेवो नरदम्यसारथिः ।।११।।
सप्तानां बुद्धधीराणां लोकनाथाग्रतायिनां ।
उद्दिष्टः प्रातिमोक्षोयं विस्तरेण यशस्विनाम् ।।१२।।
अस्मिन्सगौरवा बुद्धा बुद्धानां श्रावकाश्च ये ।
अस्मिन्सगौरवा भूत्वा प्राप्तमध्वमसंस्कृतम् ।।१३।।

[1] cf. *Dhammapada*, Pupphavagga, verse 6.
[2] cf. *Ibid.*, *loc. cit.*, verse 7.
[3] cf. *Ibid.*, Buddhavagga, verse 5.
[4] cf. *Ibid.*, Bhikkhuvagga, verse 2.

आरभध्वं निष्क्रामत युक्तयाध्वं बुद्धशासने ।
धुनीत मृत्युनः सैन्यं नडागारमिव कुञ्जरः[1] ॥१४॥
यो ह्यस्मिन्धर्मविनये अप्रमत्तश्चरिष्यति ।
प्रहाय जातिसंसारं दुःखस्यान्तं करिष्यति[2] ॥१५॥
अन्योन्यं शीलगुप्त्यर्थं शासनस्य च वृद्धये ।
उद्दिष्टः प्रातिमोक्षोयं कृतसंघेन पोषधः ॥१६॥
यस्यार्थे सूत्रमुद्दिष्टं यस्यार्थे पोषधः कृतः ।
तच्छीलमनुरक्षध्वं बालाग्रं चमरो यथा ॥१७॥
प्रातिमोक्षसमुद्देशाद्यत्पुण्यं समुपार्जितं ।
अशेषस्तेन लोकोयं मौनीन्द्रं पदमाप्नुयात् ॥१८॥

॥ प्रातिमोक्षः समाप्तः ॥

[1] *Saṁyutta Nikāya* (P.T.S., ed.), pt. I, p. 157 :—

आरब्भथ निक्खमथ युञ्जथ बुद्धसासने ।
धुनाथ मच्चुनो सेनं नाळागारं व कुञ्जरो ॥

[2] *Ibid.*, p. 157 :—

यो इमस्मिं धम्मविनये अप्पमत्तो विहस्सति ।
पहाय जातिसंसारं दुक्खस्सन्तं करिस्सति ॥

# The Bhikṣukarmavākya

In the following pages is presented an edition of the Sanskrit *Bhikṣukarmavākya* on the basis of the manuscript discovered at Gilgit in Kashmir. There are, however, a few scribal inaccuracies and lacunae in the manuscript. They have been corrected and the lacunae supplied with the help of the Tibetan. The passages reconstructed have been put within bracket. It is a short treatise describing the procedure of ordination of a monk. The procedure as laid down in Pali, lying scattered here and there in the *Mahāvagga*, Chapter I, and that also very concisely, has not been systematically arranged in any work.[1] In the *Descriptive Catalogue of Sanskrit Manuscripts* Mm. H. P. Shastri quotes a passage from the *Kriyāsaṃgrahapañjikā* or the *Kuladattapañjikā* which gives an account of the procedure to be followed during the ordination of a monk but the details are scanty and widely different from those laid down in this treatise—points of agreement being few. The *Bodhisattvaprātimokṣa Sūtra*, a Mahāyānic treatise, edited by Dr. N. Dutt gives us an account of the ceremony of ordination but it also differs greatly from those as laid down in the present text. The Tibetan version of this treatise appears in the Sde-dge edition of the Kanjur, Vol. Ka. folios 47b$^7$-63b$^7$. It may be mentioned that the Tibetan containing, as it does, a faithful translation of our present treatise is more elaborate in its account of the procedure of the ceremony.

The *Bhikṣukarmavākya*, as far as we know, has not yet been published, although the fragments of the *Bhikṣuṇīkarmavākya*, discovered in Central Asia, have been published by Miss C. M. Ridding and Prof. L. de la Valleé Poussin.[2]

[1] Sri Bimalānanda Bhikṣu has, however, edited the Pali *Kammavācā*—Published from Kartala Vihara, Chittagong.

[2] *Bulletin of the School of Oriental Studies*, London Institution, Vol. I (1917-20), pp. 123-143.

नमः सर्वज्ञाय ॥

श्रृणोतु भदन्तः संघः अहमेवंनामा संघा[1]त्प्रव्रज्योपसंपदं भिक्षुभावं याचे यदुपसंपादयतु मां भदन्तः संघोऽनुकम्पकोऽनुकम्पामुपादाय। [एवं त्रिरपि वक्तव्यम्। याचिते पश्चादेकेन भिक्षुणा एवं करणीयं निषद्य प्रज्ञापितव्यम्।][2] श्रृणोतु भदन्तः संघः संघात्प्रव्रज्योपसंपददं भिक्षुभावं याचते। सचेत्संघस्य प्राप्तकालं क्षमते अनुजानीयात्संघो यत्संघ एवंनामानं प्रव्राजयते उपसंपादयेदेषा ज्ञप्तिः[3]। [एवं हि कार्यम्।][4] श्रृणोतु भदन्तः संघः अयमेवंनामा संघात् प्रव्रज्योपसंपदं [भिक्षुभावं][5]याचते तत्संघः एवंनामानं प्रव्राजयति उपसंपादयति। येषामायुष्मतां क्षमते एवंनामानं प्रव्राजयन्तं उपसंपादयितुं ते तूष्णीम्। येषां न क्षमते ते भाषन्ताम्। [इयं प्रथमा कर्मवाचना। एवं द्विरपि त्रिरपि।][6] प्रव्राजितं उपसंपादितमेवंनामा संघेन क्षान्तमनुज्ञातं यस्मात्तूष्णीमेवमेतद्धारयामि।

[1] Ms. संघप्र०, Tib. Dge-ḥdun-las-rab-tu-byuṅ-daṅ-bsñen-par-rdzogs-pa.

[2] Tib. De-bžin-du-lan-gñis-lan-gsum-du-bzlas. Deḥi-ḥog-tu-dge-sloṅ-gcig-gis-gsol-ba-byas-te-las-byaḥo. Ḥdi-ltar-byas-pa-te. Ḥdug-la-ḥdi-skad-brjod-par-bya-ste. Cf. Pali ब्यत्तेन भिक्खुणा पटिबलेन संघो ञापेतब्बो।

[3] This is called ñattikamma in Pali and when the announcement is followed by declarations made thrice, it is then called ñatticatutthakamma—*Mahāvagga*, p. 56.

[4] Tib. Las-ni-ḥdi-ltar-bya-ste.

[5] Tib. Dge-sloṅ-gi-dṅos-po.

[6] Tib. Ḥdi-ni-las-brjod-pa-daṅ-po-ste. De-bžin-du-lan-gñis-lan-gsum-du-bzlas.



[एष हि पूर्वविधिः।][1] समन्वाहर[2] अहमेवंनामा बुद्धं शरणं गच्छामि द्विपदानामग्र्यम्। धर्मं शरणं गच्छामि विरागाणामग्र्यम्। संघं शरणं गच्छामि गणानामग्र्यम्। उपासकं मां भदन्तो धारयतु यावज्जीवम्[3]। समन्वाहर आचार्य यथा ते आर्याः अर्हन्तो यावज्जीवं प्राणातिपातं प्रहाय प्राणातिपातात्प्रतिविरता एवमहमेवंनामा यावज्जीवं प्राणानिपातात्प्रतिविरमामि। अनेनाहं प्रथमेनाङ्गेन तेषामार्याणामर्हतां शिक्षायामनुशिक्षे अनुविधीये अनुकरोमि। यथा ते आर्याः यावज्जीवमदत्तादानं[4] काममिथ्याचारं[5] मृषावादं सुरामैरेयमद्यप्रमादस्थानं प्रहाय सुरामैरेयप्रमादस्थानात्प्रतिविरताः एवमेवाहमेवंनामा यावज्जीवमदत्तादानं काममिथ्याचारं मृषावादं सुरामैरेयमद्यप्रमादस्थानं प्रहाय सुरामैरेयमद्यप्रमादस्थानात्प्रतिविरमामि। अनेन पञ्चमेनाङ्गेन तेषामार्याणामर्हतां[6] शिक्षायामनुशिक्षे अनुविधीये अनुकरोमि[7]। भदन्ताः समन्वाह्रियंताम् अयमेवंनामा एवंनाम्नः [उपाध्यायात्][8] गृहीतावदातवसनः[9] अनवतारितकेशश्मश्रुराकांक्षते स्वाख्याते धर्मविनये प्रव्रजितुम्। सोयमेवंनामा एवंनाम्नोपाध्यायेन स्वाख्याते धर्मविनये केशश्मश्रुवतार्य काषायाणि वस्त्राण्याच्छाद्य सम्यगेव श्रद्धया अगारादनागारिकां प्रव्रजिस्यति[10]। किं प्रव्रजतु। समन्वाहर

[1] Tib. De-ni-sjon-gyi-cho-gaḥo.

[2] Tib. is elaborate.

[3] Tib. is elaborate.

[4] Ms. ०पयत्ता०, Tib. Ji-srid-ḥtshohi-bar-du-ma-byin-par-len-pa.

[5] Ms. वारं०, Tib. Ḥdod-pas-log-par-gyel-ba.

[6] Ms. ०ह्तां, Tib. Dgra-bcom-pa.

[7] Tib. is elaborate.

[8] Tib. Mkhan-po-miṅ-hdi-žes-bgyi-ba-las.

[9] Ms. प्रव्यूज्यलत्त-गृही०, Tib. Khyim-pa-gos-dkar-po-can.

[10] Tib. is elaborate.

आचार्य अहमेवंनामा आचार्यमुपाध्यायं याचे। आचार्यो मे उपध्यायो भवतु। आचार्येण उपाध्यायेन प्रव्रजिष्यामि[1]। समन्वाहर उपाध्याय अहमेवंनामा [अद्याग्रे यावज्जीवं][2] बुद्धं शरणं गच्छामि द्विपदानामग्र्यम्। धर्मं शरणं गच्छामि विरागाणामग्र्यम्। संघं शरणं गच्छामि गणानामग्र्यम्। तं भगवन्तं शाक्यमुनिं शाक्यसिंहं शाक्याधिराजं तथागतं अर्हन्तं सम्यक्संबुद्धं प्रव्रजितमनुप्रव्रजामि। गृहलिङ्गं समुत्सृजामि। प्रव्रज्यालिङ्गं समाददे। एवं द्विरपि त्रिरपि[3]। समन्वाहर भदन्त अहमेवंनामा [अद्याग्रे यावज्जीवम्][4] बुद्धं शरणं गच्छामि द्विपदानामग्र्यम्। धर्मं शरणं गच्छामि विरागानामग्र्यम्। संघं शरणं गच्छामि गणानामग्र्यम्। श्रामणेरं मां भदन्तो धारयतु [यावज्जीवम्। एवं द्विरपि त्रिरपि।][5] समन्वाहर आचार्य यथा ते आर्या अर्हन्तो यावज्जीवं प्राणातिपातं प्रहाय प्राणातिपातात्प्रतिविरता एवमेवाहं एवंनामा यावज्जीवं प्राणातिपातं प्रहाय प्राणातिपातात्प्रतिविरमामि। अनेनाहं प्रथमेनाङ्गेन तेषामार्याणामर्हतां शिक्षायामनुशिक्षे अनुविधीये अनुकरोमि। यथा ते आर्याः अर्हन्तो यावज्जीवमदत्तादानं अब्रह्मचर्यं मृषावादं सुरामैरेयमद्यप्रमादस्थानं नृत्यगीतवादित्र[6]मालागन्धविलेपनवर्णकधारणं उच्चशयनमहाशयनं जातरूपरजतप्रतिग्रहं[7] प्रहाय जातरूपरजतप्रतिग्रहात्प्रतिविरतः एवमेवाहं एवंनामा यावज्जीवमदत्तादानमब्रह्मचर्य्यं मृषावादं सुरामैरेयमद्यप्रमादस्थानं नृत्यगीतवादित्रमालागन्धविलेपनवर्णकधारणं उच्चशयन-

[1] Tib. is elaborate.

[2] Tib. Dus-ḥdi-nas-bzun-ste-ji-srid-ḥtshoḥi-bar-du.

[3] Tib. is elaborate.

[4] Tib. Dus-ḥdi-nas-bzuṅ-ste-srid-ḥtshoḥi-bar-du.

[5] Tib. Ji-srid-ḥtshoḥi-bar-du........de-bžin-du-las-gñis-lan-gsum-du-bzlas.

[6] Ms. ०वादित०, Tib. Glu-daṅ. Gar-daṅ. Rol-moḥi-sgra-daṅ.

[7] Ms. ०प्रतिगह०, Tib. Gser-dṅul-len-pa-spaṅs-te.



महाशयनमकालभोजनं जातरूपरजतप्रतिग्रहं प्रहाय जातरूपरजतप्रतिग्रहात्प्रतिविरमामि। अनेनाहं दशमेनाङ्गेन तेषामार्याणामर्हतां शिक्षायामनुशिक्षे अनुविधीये अनुकरोमि[1]। समन्वाहर भदन्त अहमेवंनामा भदन्तं उपाध्यायं याचे। भदन्तो मे उपाध्यायो भवतु। भदन्तेन उपाध्यायेन उपसंपत्स्ये[2]। समन्वाहर उपाध्याय अहमेवंनामा इदं चीवरं संघाटीं अधितिष्ठामि कृतनिश्चितं चीवरं पारिभोगिकम्[3]। समन्वाहर उपाध्याय अहमेवंनामा इदं चीवरं उत्तरासंगं अधितिष्ठामि कृतनिश्चितं चीवरं पारिभोगिकम्[4]। समन्वाहर उपाध्याय अहमेवंनामा इदं चीवरं अन्तर्वासं अधितिष्ठामि कृतनिश्चितं चीवरं पारिभोगिकम्[5]। समन्वाहर उपाध्याय इदं चीवरं संघाटीं अधितिष्ठामि। आकांक्षमाणः नवं करिष्यामि। अर्धतृतीयमण्डलकं अनन्तरायेण धाविष्ये[6] वितरिष्यामि छेत्स्ये संभंतूस्यामि[7] संग्रन्थिष्ये सेविष्यामि रंक्ष्ये। आसेवकान् वा अत्र आरोपयिष्यामि चीवरं पारिभोगिकम्[8]। समन्वाहर उपाध्याय अहमेवंनामा इदं चीवरं उत्तरासंगं अधितिष्ठामि। आकांक्षमाणः सप्तकं करिष्यामि। अर्धतृतीयमण्डलकं अनन्तरायेण धाविष्ये वितरिष्यामि छेत्स्ये संभंत्स्यामि[9] संग्रन्थिष्ये सेविष्यामि रंक्ष्ये। आसेवकान् अत्र आरोपयिष्यामि चीवरं पारिभोगिकम्[10]। समन्वाहर उपाध्याय अहमेवंनामा इदं चीवरं अन्तर्वासं

[1] Tib. is elaborate

[2] Tib. is elaborate.

[3] Tib. is elaborate.

[4] Tib. is elaborate.

[5] Tib. is elaborate.

[6] Ms. धारयिष्ये, Tib. Bkruḥo.

[7] Ms. संभत्त्यामि, Tib. Gzuṅs-gdab-po.

[8] Tib. is elaborate.

[9] Ms. संभत्स्यामि, Tib. Gzuṅs-gdab-po.

[10] Tib. is elaborate.

अधितिष्ठामि। आकांक्षमाणः[1] पञ्चकं करिष्यामि। अर्धतृतीयमण्डलकं अनन्तरायेण धाविष्ये[2] वितरिष्यामि छेत्स्ये संभंत्स्यामि संग्रन्थिष्ये सेविष्यामि रंक्ष्ये। आसेवकान्वा अत्र आरोपयिष्यामि चीवरं पारिभोगिकम्[3]। समन्वाहर उपाध्याय अहमेवंनामा इदं पात्रं ऋषिभाजनं भिक्षाभाजनं पारिभोगिकम्[4]। एवंनाम्नैवंनाम्नो रहोनुशासकोधीष्टः अहमेवंनामा उत्सहसे त्वमेवंनामा नैवंनामानं रहसि अनुशासितुं एवंनाम्नोपाध्यायेन उत्सहे[5]। शृणोतु भदन्तः संघः अयमेवंनामा भिक्षुरुत्सहते एवंनामानं रहस्यनुशासितुं एवंनाम्नोपाध्यायेन। सचेत्संघस्य प्राप्तकालं क्षमेतानुजानीयात् संघः इदमेवंनामा भिक्षुरेवंनामानं रहस्यनुशासिष्यति एवंनाम्नोपाध्यायेन। एषा ज्ञप्तिः[6]। शृणुत्वमायुष्मन् अयं ते भूतकालः। अयं सत्यकालः। यच्चाहं किञ्चित्पृच्छामि तत्त्वया लज्जितेन[7] [मा][8] भूत्वा भूतं च भूततो वक्तव्यम् अभूतं च अभूततोऽनिर्वेठयितव्यम्[9]। पुरुषोऽसि। पुरुषः पुरुषेन्द्रियेण समन्वागतः[10]। परिपूर्णविंशतिवर्षः। परिपूर्णं ते त्रिचीवरं पात्रं च। जीवतस्ते मातापितरौ। अनुज्ञातोसि मातापितृभ्याम्। मासि दासः। मा आहतकः। मा प्राप्तकः। मा वक्तव्यकः। मा विक्रीतकः। मा राजभटः। मा राजकिल्विषी। मा राजतथ्यकारी। मा ते राजा पथ्यं कर्म कृतं बा कारितं वा। मासिचौरो धजबन्धकः।

[1] Ms. आकांद्व, Tib. Ḥtshal-na.
[2] Ms. धारयिष्यामि, Tib. Bkruḥo.
[3] Tib. is elaborate.
[4] Tib. is elaborate.
[5] Tib. is elaborate.
[6] Tib. is elaborate.
[7] Ms. विशारदेन, Tib. Ḥdzem-par-byas-la.
[8] Tib. ma.
[9] Ms. निवीढयितव्यम् Cf. Pali nibbeṭheti.
[10] Tib. is elaborate.



मा शणठकः। मा पण्डकः। मा भिक्षुणीदूषकः। मा स्तेनसंवासिकः[1]। मा नानासंवासिकः। मा मातृघातकः। मा पितृघातकः। मा अर्हद्घातकः। मा संघभेदकः। मा तथागतस्यान्तिके दुष्टचित्तरुधिरोत्पादकः। मा नागः[2]। [मा पशुः।][3] मा ते कस्यचित्किञ्चिद्देयमल्पं वा प्रभूतं वा शक्नोषि[4] वा उपसम्पदं[5] दातुम्। मासि पूर्वं प्रव्रजितः। चतुर्णां पाराजिकानामन्यतमोऽन्यतमामापत्तिमापन्नः। कश्चिदसि एतर्हि प्रव्रजितः सम्यक् ते ब्रह्मचर्यं चीर्णं। किंनामा त्वम्। किंनामा ते उपाध्यायः। शृणु त्वमायुष्मन्। भवन्ति खलु पुरुषाणामिमे[6] एवंरूपाः[7] काये कायिकाः[8] आबाधाः। तद्यथा कुष्ठं। गंडः। किटिभः। किलासं। दद्रुः कंडुः। कच्छू। रजतम्। विषूचिका। विचर्चिका। हिक्का। ज्वरः। क्षयः। कासः। श्वासः शोषः। अपस्मारो। लोहलिङ्गम्। आटक्करः। पाण्डुरोगः। अङ्गवेदः। गुल्मं। रुधिरं। भगन्दरः। अर्शांसि। च्छर्दिः। मूत्ररोगः श्लीपदं। क्लमः। अङ्गदाहः। पार्श्वदाहः। अस्थिभेदः। एकाहिकः। द्वैतीयकः। त्रैतीयकः। चातुर्थिकः। नित्यज्वरः। विषमज्वरः। सन्निपातः। मा ते एवंरूपाः काये कायिका आबाधाः संविद्यन्ते। अन्ये वा एवंरूपाः। यदसि एतर्हि मया पृष्टः। एतदेव सब्रह्मचारिणः[9] [विज्ञाः][10] संघमध्ये

[1] Ms. स्तेय०
[2] Ms. निन्दितो, Tib. Sbrul-la-ma-yin-nam.
[3] Tib. Dud-ḥgro-ma-yin-nam.
[4] Ms. शिक्तसि, Tib. Nus-sam.
[5] Ms. प्रव्रज्य, Tib. Bsñen-par-rdzogs.
[6] Ms. इयं, Tib. Ḥdi-dag.
[7] Ms. एवंरूप:
[8] Ms. शिल
[9] Ms. ते, Tib. Tshaṅs-pa-mtshuṅs-par-spyod-pa.
[10] Tib. Mkhas-pa-rnams.

प्रक्ष्यन्ति। तत्रापि त्वया लज्जितेन[1] [मा][2] भूत्वा भूतं भूततो वक्तव्यम्। अभूतं च अभूततो निर्वेठयितव्यम्। तिष्ठ। मा अशब्दितः आगमिष्यसि। शृणोतु भदन्तः संघः समनुशिष्टो मया एवंनामा रहसि आन्तरायिकान् धर्मान् एवंनाम्नोपाध्यायेन। किमागच्छतु[3]। शृणोतु भदन्तः संघः अहमेवंनामा अर्थहेतोः नाम गृह्णामि एवंनाम्नोपाध्यायेन उपसंपत्प्रेक्षः[4] सोहमेवंनामा संघादुपसंपदं याचे एवंनाम्नोपाध्यायेन। उपसंपादयतु मां भदन्तः संघः। अनुकर्तुं मां भदन्तः संघः अनुकम्पकोऽनुकम्पामुपादाय।

शृणोतु भदन्तः संघः अयमेवंनामा एवंनाम्नः उपसंपत्प्रेक्षः सोऽयमेवंनामा संघादुपसंपदं याचते एवं नाम्नोपाध्यायेन। सचेत्संघस्य प्राप्तकालं क्षमेतानुजानीयात् संघः यद्वयं एवंनामानं संघमध्ये आन्तरायिकान् धर्मान् पृच्छेम एवंनाम्नोपाध्यायेन। एषा ज्ञप्तिः। शृणु त्वमायुष्मन् अयं ते पूर्ववत् सर्वम्[5]। शृणोतु भदन्तः संघः अयमेवंनामा एवंनाम्नः उपसंपत्प्रेक्षः परिपूर्णविंशतिवर्षः। एरिपूर्णमस्य त्रिचीवरं पात्रं। परिशुद्धं आन्तरायिकैर्धर्मैरात्मानं वदति। सोयमेवंनामा एवंनाम्नोपाध्यायेन संघादुपसंपदं याचते। सचेत्संघस्य प्राप्तकालं क्षमेतानुजानीयात्संघो यत्संघः एवंनामानं उपसंपादयेत् एवंनाम्नोपाध्यायेन। एषा ज्ञप्तिः।

शृणोतु भदन्तः संघः अयमेवंनामा एवंनाम्नः उपसंपत्प्रेक्षः पुरुषः परिपूर्णविंशतिवर्षः। परिपूर्णमस्य त्रिचीवरं पात्रं च। परिशुद्धमान्तरायिकैर्धर्मैः आत्मानं वदति। सोऽहमेवनाम्ना उपाध्यायेन संघादुपसंपदं याचते तत्संघः एवंनामानं उपसंपादयति एवंनाम्ना उपाध्यायेन। येषामायुष्मतां क्षमते एवंनामानं उपसंपादयितुं एवंनाम्ना उपाध्यायेन ते तूष्णीं।

[1] Ms. बिशारदेन, Tib. Ḥdzems-pa.

[2] Tib. ma.

[3] Tib. is elaborate.

[4] Ms. उपसंक, Tib. Bsñen-par-rdzogs-par-gsol-na.

[5] Tib. repeats *verbatim*.



येषां न क्षमते ते भाषन्ताम्। इयं प्रथमा कर्मवाचना। एवं द्विरपि त्रिरपि। उपसंपद्यते संघेन एवंनामा एवंनाम्नोपाध्ययेन क्षान्तमनुज्ञातं यस्मात्तूष्णीं एवं एतद्धारयामि[1]। शृणु त्वमायुष्मन् चत्वार इमे तेन भगवता जानता पश्यता तथागतेन अर्हता सम्यक् संबुद्धेन एवं प्रव्रजितोपसंपन्नस्य भिक्षोर्निःश्रया[2] आख्याता यं निःश्रित्य भिक्षोः स्वाख्याते धर्मविनये प्रव्रज्योपसंपद्भिक्षुभावः। उत्सहसे त्वमेवंनामा यावज्जीवं पांसुकुलेन चीवरेण यापयितुम्। उत्सहे। अतिरेकलाभः पटिर्वा[3] प्रावरो वा कोशेयो वा आमिलका वा कृमिवर्णा वा समवर्णा वा दुर्वर्णा वा ऊर्णं वा ऊर्णकं वा शाणकं वा क्षोमकं वा कार्पासिकं वा दुकुलं[4] वा कौत्मपकं[5] वा परान्तकं वा इति यद्वा पुनरन्यदपि कल्पिकं चीवरं संघाद्वा उत्पद्यते पुद्गलतो वा तत्रापि[6] ते प्रतिग्रहे मात्रा[7] करणीया। कश्चिदेवंरूपं स्थानमभिसंभोत्स्यसे। अभिसंभोत्स्ये। शृणु त्वमेवंनामन् पिण्डपातं च भोजनानां कल्पिकं सुलभं निःश्रित्य भिक्षोः स्वाख्याते धर्मविनये प्रव्रज्योपसंपद्भिक्षुभावः। उत्सहसे त्वमेवंनामा यावज्जीवं पिण्डपातेन भोजनेन यापयितुम्। उत्सहे। अतिरेकलाभः भक्तानि वा तर्पणानि वा यवागूः पानानि वा पाञ्चमिकं वा आष्टमिकं वा चातुर्दशिकं वा पाञ्चदशिकं वा नैत्यिकं[8] वा निमन्त्रणकं वा ओत्पातिकं वा इति उत्पिण्डं वा इति यद्वा पुनरन्यदपि कल्पिकं पिण्डपातं संघाद्वा उत्पद्यते पुद्गलतो वा

[1] Tib. has more.

[2] Cf. *Mahāvagga*, p. 58 for four nissayas.

[3] Ms. ०दु

[4] Ms. ०गू०, Tib. Du-kulaḥi-ras.

[5] Ms. कोहम्भक, Tib. Kau-tam-paḥi-ras.

[6] Ms. ०लतोऽवतन्त्रापि, Tib. Gaṅ-zag-las......de-yaṅ.

[7] Ms. ०पात्रा, Tib. Tshod-zin-par-gyis-śig.

[8] Ms. ०ति०, Tib. Rtag-ṅes-ḥkhor-ram.

तत्रापि ते प्रतिग्रहे मात्रा करणीया। कश्चिदेवंरूपं स्थानं अभिसंभोत्स्ये। अभिसंभोत्स्ये।

शृणु त्वमेवंनामन् वृक्षमूलं शयनासनानां कल्पिकं वा सुलभं च यन्निःश्रित्य भिक्षोः स्वाख्याते धर्मविनये प्रवज्योपसंपद्भिक्षुभावः। उत्सहसे त्वमेवंनामन् यावज्जीवं वृक्षमूलेन शयनासनेन यापयितुम्। उत्सहे। अतिरेकलामः लयनानि वा माटा वा कूटागाराणि वा हर्म्यका वा हर्मन्तिका वा आमलकपृष्टिका वा दण्डच्छदनानि वा फलकच्छदनानि वा गिरिगुहा वा प्राग्भारगुहा वा तृणकुटिका वा पर्णकुटिका वा कृतचंक्रमा वा अकृतचंक्रमा[1] वा इति यद्वा पुनरन्यदपि कल्पिकं शयनासनं संघाद्वा उत्पद्येत पुद्गलतो वा तत्रापि ते प्रतिग्रहे मात्रा करणीया। कंचिदेवंरूपं स्थानं अभिसंभोत्स्यसे। अभिसंभोत्स्ये। शृणु त्वमेवंनामन् पूतिमुत्रभैषज्यानां कल्पिकं च सुलभं च यन्निःश्रित्य भिक्षोः स्वाख्याते धर्मविनये प्रव्यज्योपसंपद्भिक्षुभावः। उत्सहसे त्वमेवंनामा यावज्जीवं पूतिमुत्रेन भैष्यज्येन यापयितुम्। उत्सहे। अतिरेकलाभः सर्पिस्तैलं मधु फाणितं कालिकं यामिकं साप्ताहिकं यावज्जीविकं मूलभैष्यज्यं गण्डभैष्यज्यं पत्रभैष्यज्यं पुष्पभैष्यज्यं फलभैष्यज्यमिति यद्वा पुनरन्यदपि कल्पिकं भैष्यज्यं संघाद्वा उत्पद्येत पुद्गलतो वा तत्रापि ते प्रतिग्रहे मात्रा करणीया। कश्चिदेवंरूषं स्थानमभिसंभोत्स्यसे। अभिसंभोत्स्ये।

शृणु त्वममेवंनामंश्चतार इमे तेन भगवता जानता पश्यता तथागतेनार्हता सम्यक् संबुद्धेन एवं प्रव्रजितोपसंपन्नस्य भिक्षोः पतनीया धर्मा[2] आख्याताः यानध्यापद्यमानो भिक्षुः सहाध्यापत्त्या अभिक्षुर्भवत्यश्रमणः अशाक्यपुत्रीयः ध्वस्यते भिक्षुभावात् हतश्रामण्यम् ध्वस्तं मथितं पतितं पराजितमप्रत्युद्धार्यमस्य भवति श्रामण्यम्। [तद्यथा तालो मस्तकाछिन्नः

[1] Ms. ०क्र०, Tib. Ḥchag-sar-ma-byas-paḥam.

[2] Cf. Pali : cattāri akaraṇīyāni—*Mahāvagga*, pp. 96-97.



अभव्यो हरितत्वाय अभव्यो विरूटिं वृद्धिं विपलतामापत्तुम्।][1] कतमे चत्वारः। अनेकपर्यायेण कामा विगर्हिताः कामात्मयाः कामनियन्तिकाः साध्यवशकामानां[2] प्रहाणं वर्णितं प्रतिनिसर्गान्तीभावः क्षयो विरागो निरोधः[3] व्युपशमो आसमन्ततः स्तोमितो वर्णितः प्रशस्तः। अद्याग्रेण ते आयुष्मन् सरक्तचित्तेन मातृग्रामश्चक्षुरुपनिधाय[4] न व्यवलोकयितव्यः। कः पुनर्वादी द्वयद्वयसमापत्त्या अब्रह्मचर्यं मैथुनं धर्मं प्रतिसेवितुम्। उक्तं चैतदायुष्मन् तेन भागवता जानता पश्यता तथागतेनार्हता सम्यक् संबुद्धेन। यः पुनर्भिक्षुर्भिक्षुभिः सार्धं शिक्षासामीचीं समापन्नः शिक्षामप्रत्याख्याय शिक्षादौर्वल्यमनाविष्कृत्याब्रह्मचर्यं[5] मैथुनं धर्मं प्रतिसेवते अन्ततस्तिर्यग्योनिगतयापि[6] सार्धं एवंरूपं स्थानमध्यापद्य सहाध्यापत्त्या अभिक्षुर्भवत्यश्रमणः अशाक्यपुत्रीयः ध्वस्यते भिक्षुभावात् हतश्रामण्यं ध्वस्तं मथितं पतितं पराजितमप्रत्युद्धार्यमस्य भवति श्रामण्यम्। तद्यथा तालो मस्तकाछिन्नः अभव्यो विरूढिं वृद्धिं विपुलतामापत्तुम्[7]। अत्र ते अद्याग्रेण अवद्याचारेण अध्यापत्त्यावद्याचारवैरमण्या तीव्रचतेसा आरक्षस्मृत्या प्रमादे योगः करणीयः। कश्चिदेवंरूपस्थानं नाध्यापत्स्यसे। नाध्यापत्स्ये। शृणु त्वमायुस्मन् अनेकपर्यायेण भगवता अदत्तादानं प्रतिषिद्धं विगर्हितं अदत्तादानविरति स्तुता स्तोमिता वर्णिता प्रशस्ता। अद्याग्रेण ते आयुष्मन् स्तेयचित्तेन तिलतुषमपि परक्यमदत्तमादातव्यं कः

[1] Tib. Ḥdi-lta-ste-dper-na-śin-ta-laḥi-mgo-bcad-na-sjon-por-ḥgyur-du-mi-ruṅ-la. Ḥphel-žiṅ-rgyus-pa-daṅ-yaṅs-par-ḥgyur-du-mi-ruṅ-bžin-no.

[2] Ms. माध्यवस०, Tib. Ḥdod-pa-la-thag-par-žen-pa.

[3] Ms. ०ह०, Tib. Ḥgog-pa.

[4] Ms. ०निध्याय, Tib. Mig-gtad-de.

[5] Ms. ०विष्कृत्वा

[6] Ms. गतायापि

[7] Cf. Pārājikā dhammā, No. 1.

पुनर्वादः पञ्चमाषिकं वा उत्तरपञ्चमाषिकं वा। उक्तमेतदायुष्मंस्तेन भगवता जानता पश्यता तथागतेनार्हता सम्यक् संबुद्धेन। यः पुनर्भिक्षुर्ग्रामगतमरण्यगतं वा परेषां अदत्तं स्तेयसंख्यातमाददीत• यद्रूपेणादत्तादानेन राजा वैनं गृहीत्वा राजमात्रो वा हन्याद्वा संबध्नीयाद्वा प्रवासयेद्वा एवं चैनं वदेत्—त्वं भोः पुरुष चौरोऽसि बालोऽसि मुढोऽसि स्तेनोऽसीत्येवंरूपं स्थानमध्यापद्य सहाध्यापत्त्या अभिक्षुर्भवति [अश्रमणः अशाक्यपुत्रीयः ध्वस्यते भिक्षुभावात् इतश्रामण्यं ध्वस्तं मथितं पतितं पराजितमप्रम्युद्वार्यमस्य भवति श्रामण्यं।[2]] तद्यथा तालो मस्तकाछिन्नः [अभव्यो हरितत्वाय अभव्यो विरूढिं वृद्धिं विपुलतामापत्तुम्। अत्र ते अद्याग्रेण अवद्याचारेण अध्यापत्त्यावद्याचारवैरमण्यां तीव्रचेतसा आरक्षस्मृत्या प्रमादे योगः करणीयः। किञ्चिदेवरूवं स्थानं नाध्यापत्स्यसे।][3] नाध्यापत्स्ये। शृणु त्वमेवंनामन् अनेकपर्ययेण भगवता प्राणातिपातो विगर्हितः प्राणातिपातविरतिः स्तुता स्तोमिता वन्दिता प्रशस्ता। अद्याग्रेण ते आयुष्मन् [संचि[4]]न्त्य कुन्तपिपिलकोऽपि[5] प्राणेषु जीवितात् न व्यपरोपयितव्यः कः पुनर्वादो मनुष्यविग्रहं वा। उक्तं चैतदायुष्मंस्तेन भगवता जानता पश्यता तथागतेनार्हता सम्यक् संबुद्धेन। यः पुनर्भिक्षुमनुष्यं वा मनुष्मविग्रहं वा स्वहस्तेन संचिन्त्य जीविताद् व्यपरोपयेत् शस्त्रं वैनामाधारयेत शस्त्रधारकं वास्य पर्यैषेत मरणाय वैनं समादापयेत् मरणवर्णं वास्यानुसंवर्णयेत्। एवं चैनं वदेत्—हंभोः पुरुष किं त्वया

[1] Ms. स्नेयो०

[2] Tib. Dge-sbyoṅ-du-mi-ruṅ. Śākyaḥi-sras-kyir-mi-ruṅ. Dge-sloṅ-gi-dṅos-po-las-ñams-par-ḥgyur-te. Deḥi-dge-sbyoṅ-gi-tshul-zig-par-ḥgyur-žiṅ. N̄a ms-pa-bcom-pa-ltuṅ-pa-pham-par-ḥgyur-ba-ste. Deḥi-dge-sbyoṅ-gi-tshul-phyir-bslaṅ-med-par-ḥgyur-ro. Cf. Pārājikā dhammā, No. 2.

[3] For Tib. see *supra*.

[4] Tib. Bsam-bžin-du.

[5] Ms. क्त०



पापकेनाशुचिना दुर्जीवितेन मृतं ते भोः पुरुष जीविताद्वरमितिचिन्तानुमतैश्चित्तसंकल्पैरनकेपर्यायेण मरणाय वैनं समादापयेत् मरणवर्णं वास्य अनुसंवर्णयेत् स च तेन कालं कुर्यादित्येवंरूपो भिक्षुः स्थानमध्यापद्य सहाध्यापत्त्या अभिक्षुर्भवति अश्रमणः अशाक्यपुत्रीयः [ध्वस्यते भिक्षुभावात् हतश्रामण्यं ध्वस्तं मथितं पतितं पराजितमप्रत्युद्वार्यमस्य भवति श्रामण्यम्।[1] तद्यथा तालो मस्तकाछिन्नः अभव्यो हरितत्वाय अभव्यो विरूढिं वृद्धिं विपुलतामाप्त्तुम्। अद्य ते अद्याग्रेण अवद्याचारेण अध्यापत्त्यावद्याचारवैरमण्यां तीव्रचेतसा आरक्षस्मृत्या प्रमादे योगः करणीयः। किञ्चिदेवरूपं स्थानं नाध्यापत्स्यसे। नाध्यापत्स्ये।][2] शृणु त्वमायुष्मन् अनेकपर्यायेण भगवता मृषावादो विगर्हितः मृषावादविरतिः स्तुता स्तोमिता वन्दिता प्रशस्ता। अद्याग्रेण ते आयुष्मन् हास्यप्रेक्षणोऽपि संप्रजानमृषावाक् न भाषितव्या कः पुनर्वादोऽसन्तमसंविद्यमानमुत्तरसनुष्यधर्मं प्रलपितुम्। उक्तं चैतत् आयुष्मन् तेन भगवता जानता पश्यता तथागतेनार्हता सम्यक् संबुद्धेन। यः पुनर्भिक्षु[रनभिजानन्नपरिजानन्न][3] सन्तमसंविद्यमानमुत्तरमनुष्यधर्ममलमार्यविशेषाधिगमं ज्ञानं वा दर्शनं वा स्पर्शविहारतां वा प्रतिजानीयादिदं जानामीदं पश्यामीति स परेण समयेन समनुयुज्यमानो वा असमनुयुज्यमानो वा आपन्नो विशुद्धि प्रेक्ष्यैवं वदेदजानन्नेवाहमायुष्मनतोऽवोचं जानामीति पश्यामीति[रिक्तं तुच्छं मृषाव्यपलपनमन्यत्राभिमानात् अयमपि भिक्षुः पाराजिको भवत्यसंवास्यः।][4] किं जानासि।[5] दुःखं जानामि। समुदयं निरोधं मार्गं

[1] Cf. Pārājikā dhammā, No. 3,

[2] For Tib. see *supra*.

[3] Tib. Mṅon-par-mi-siṅ-yoṅs-su-mi-śes-la.

[4] Tib. Gsob-gsog-brdzun-du-smras-so-žes-zer-na-mṅon-paḥi-ṅa-rgyal-ma-gtogs-te. Dge-sloṅ-de-yaṅ-pham-par-gyur-ba-yin-gyis-gnas-par-mi-byaḥo-žes-bya-ba-ḥdi-bkaḥ-stsal-te. Cf. Pārājikā dhammā, No. 4.

[5] Ms. ०नामि

जानामि। किं पश्यसि। देवान् पश्यामि। नागान् यक्षान् गन्धर्वान् किन्नरान् महोरगान् प्रेतान् पिशाचान् कुम्भाण्डान् कटपुतनान् [पश्यामि।[1] देवाः अपि मां पश्यन्ति। नागाः यक्षाः गन्धर्वाः किन्नराः महोरगाः प्रेताः पिशाचाः कुन्भाण्डाः कटपूतनाः अपि मां पश्यन्ति। देवानां शब्दं शृणोमि। नागानां यावत्कटपूतानां शब्दं शृणोमि। देवाः अपि मम[2] शब्दं शृण्वन्ति। नागाः यावत्कटपूतनाः अपि मम शब्दं शृण्वन्ति। देवानां दर्शनाय डपसंक्रमामि.। नागानां यावत्कट-पूतानां दर्शनाय उपसंक्रमामि। देवाः अपि मां दर्शनाय उपसंक्रामन्ति। नागाः यावत्कटपूतनाः अपि मां दर्शनाय उपसंक्रामन्ति। देवैः सार्ध-मालपामि संलपामि प्रतिसंमोदे सातत्यं समापद्ये। नागैः यावत्कटपूतनैः सार्धमालपामि संलपामि प्रतिसंमोदे सातत्यं समापद्ये। देवाः अपि मया सार्धमालपन्ति संलपन्ति प्रतिसंभोदन्ते सातत्यं समापद्यन्ते। नागाः यावत्कटपूतनाः अपि मया सार्धमालपन्ति संलपन्ति प्रतिसंमोदन्ते सातत्यं समापद्यन्ते। अलभ्ये[3] वसन् अनित्यसंज्ञया लभ्योहमस्मि[4] इत्यात्मानं प्रति-जानीते। अनित्ये दुःखसंज्ञया दुःखे अनात्मसंज्ञया आहारे प्रतिकूलसंज्ञया सर्वलोके अनभिरतिसंज्ञया आलोकसंज्ञया प्रहरणसंज्ञया विरागसंज्ञया निरोधसंज्ञया मरणसंज्ञया। अलम्ये[5] वसन् अशुभसंज्ञया न शुभसंज्ञया अलम्मोहमस्मि[6] इत्यात्मानं प्रतिजानीते। विनीलकसंज्ञया[7] विपूयकसंज्ञया[8]

[1] Tib. Mthoṅ.

[2] Ms. मां, Tib. Bdag-gi.

[3] Ms. ०ला०

[4] Ms. लाभ्यमस्मि

[5] Ms. ०लो०

[6] Ms. ०लोभ्यहमस्मि

[7] Ms. ०न०, Tib. Rnam-par-sṅos-paḥi-du-śes·daṅ.

[8] Ms. विप्रतोक, Tib. Rnam-par-rnags-paḥi-hdu-śes.



व्यात्मात्मककसंज्ञया[1] विपद्मकसंज्ञया[2] विखादितसंज्ञया विलोहितकसंज्ञया विक्षिप्तकसंज्ञया अस्थिसंज्ञया[3] शून्यताप्रत्यवीक्षणसंज्ञया लश्योऽहमस्मि इति प्रतिजानीते। अलम्ये वसन् प्रयमस्य ध्यानस्य द्वितीवस्य तृतीयस्य चतुर्थस्य धानय्य मैत्र्याः करुणायाः मुदितायाः उपेक्षायाः आकाशानन्त्या-यतनस्य विज्ञानानन्त्यायतनस्य अकिञ्चिन्यायतनस्य नैवसंज्ञानासंज्ञाय-तनस्य[4] स्त्रोतापत्तिफलस्य[5] सकृदागामिफलस्य[6] अनागामिफलस्य[7] [अर्ह-त्त्वफलस्य][8] ऋद्धिविषयस्य[9] दिवस्स श्रोतस्य चेतःपर्यायस्य पूर्वनिवासस्य[10] चयुत्युपहानस्य अनर्हन्नेव समानोऽहमस्मि अष्टविमोक्षध्यायी इत्यात्मानं प्रतिजानीते। अन्यत्र प्रतिमानात् इत्येवंरूपं भिक्षुः स्थानमवपद्य सहाध्या-पत्त्या अभिक्षुर्भबति। अश्रमणः अशाक्यपुत्रीयः ध्वस्यते भिक्षुभावात् हतमस्य भवति श्रामण्यं ध्वस्तं मथितं पतितं पराजितं अप्रत्युद्धार्यमस्य भवति श्रामण्यम्। तद्यथा तालो मस्तकाच्छिन्नः अभव्यो हरितत्वाय अभव्यो विरूढिं वृद्धिं विपुलतां आपत्तुम्। अत्र ते अद्याग्रेण अनध्याचारे

[1] Ms. व्याद्यातक०, Tib. Rnam-par-bam-paḥi-hdu-śes.

[2] Ms. विपदुक०, Tib. Rnam-par-ḥbus-gži-gas-paḥi-hdu-śes.

[3] These are ten aśubhabhāvanās. In Pali there are ten asubhasaññās while in *Mahāvyutpatti* (ed. Sakkaki, pp. 87-88) they are only nine. These saññās (notions) are necessary for the full meditation on Mi-sdug-pa.

[4] These four pieces of *kammaṭṭhānas* are called *Āruppa*.

[5] A *sotāpanna* is one who has entered the first sanctification.

[6] A *sakadāgāmin* is one who has one birth more in this world.

[7] An *anāgāmin* is one who will not be born in this earth but in a *Brahmaloka*.

[8] Tib. Dgra-bcom-pa-ñid-ḥbras-su —an *arhat* is one who is no more subject to rebirth.

[9] Ms. रि०, Tib. Rdzu-ḥphul-gyi-yul.

[10] Ms. श्रपू०, Tib. Sjon-gyi-gnas.

अनध्यापत्त्या अनध्याचारवैरमण्यां तीव्रचेतसा आरक्षस्मृत्या प्रमादे योगः करणीयः। किञ्चिदेवं स्थानमध्यापत्स्ये। नाध्यापत्स्ये। [इमे खलु पतनीया धर्मा आख्याताः। अतः श्रमणकारकाः धर्मा आख्यातव्याः।][1] शृणु त्वमायुस्मन् चत्वारः इमे तेन भगवता जानता पश्यता तथागतेनार्हता सम्यक् संबुद्धेन श्रमणकारकाः धर्माः आख्याताः। कतमे चत्वारः। अद्याग्रेण ते आयुष्मता—

आक्रुष्टेन न प्रत्याक्रोष्टव्यम् रोषितेन न प्रतिरोषितव्यम्।
ताडितेन न प्रतिताडितव्यम् भण्डितेन[2] न प्रतिभण्डितव्यम्[3] ॥

किञ्चिदेवंरूपं स्थानं अध्यापत्स्यसे। न अध्यापत्स्ये। शृणु त्वमायुत्मन् यस्ते अभूत् पूर्वमाशासकः कश्चिदहं लभेयं स्वाख्याते धर्मविनये प्रव्रज्यामुपसंपदं भिक्षुभावं च। सत्वमेतर्हि प्रव्रजितं उपसंपन्नम् प्रतिरूपेण उपाध्यायेण प्रतिरूपाभ्यामाचार्याभ्यां समग्रेण संघेन [ज्ञ]प्तिचतुर्थेन[4] कर्मणा अकोप्येन अनास्थापनार्हेण यत्र वर्षशतोपसंपन्नेन भिक्षुणा शिक्षायां शिक्षितव्यं तत्र तदहोपसंपन्नेन इति यत्र समानशीलता समानशिक्षता समानप्रातिमोक्षसूत्रोद्देशता सा अद्याग्रेण आरागयितव्या न विरागयितव्या[5]। अद्याग्रेण ते उपाध्यायस्यान्तिके पितृसंज्ञा स्थापयितव्या उपाध्यायेनापि तवान्तिके पुत्रसंज्ञा उपस्थापयितव्या अद्याग्रेण ते उपाध्यायो यावज्जीवं उपस्थापयितव्यः। उपाध्यायेनापि त्वं ग्लानः उपस्थापयितव्यः आमरणाय वा व्युत्थानाय[6] वा। अद्याग्रेण ते

[1] Tib. De-ni-ltuṅ-bar-ḥgyur-baḥi-chos-rnams- brjod-paḥo. Deḥi-ḥog-tu-dge-sbyoṅ-du-byed-chos-rnams-brjod-par-bya-ste.

[2] Ms. म०, Tib. Mtshaṅ-bras-kyan-slar.

[3] ०मण्डि०, Tib. Mtshaṅ-mi-bra-par-byaḥo—these are called श्रमणधर्माः। Cf. Finot's *Prātimokṣasūtra*, p. 83.

[4] Tib. Gsol-ba-daṅ-bžiḥi-las.

[5] Tib. has more.

[6] Ms. श्रवरणाय वा न्व्युत्थनाम वा, Tib. Śiḥam-sos-kyi-bar-du. Cf. *Mahāvagga*, pp. 45-53.



सगौरवेण विहर्तव्यम् सप्रतीशेण[1] सभयवशवर्त्तिना[2] सब्रह्मचारिषु स्थविरेषु मध्येषु नवकेषु। अद्याग्रेण ते उद्देष्टव्यम् पठितव्यं स्वाध्यायितव्यं स्कन्धकौशल्यं धातुकौशल्यं करणीयं आयतनकौशल्यं प्रतीत्यसमुत्पादकौशलं स्थानास्थानकौशलं धूः[3]च तेन निक्षेप्तव्या अप्राप्तस्य प्राप्तये अनधिगतस्याधिगमाय[4] असाक्षात्कृतस्य साक्षात्क्रियायै इमानि च ते मया औदारिकौदारिकानि शिक्षापदानि आख्यातानि अन्यानि वा तानि अन्वर्धमासं प्रातिमोक्षसूत्रोद्देशे उद्दिश्यमाने श्रोष्यसि अन्यानि च ते आचार्योपाध्यायाभ्यां ग्राहयिष्यन्ति। समानोपाध्यायाः समानाचार्याः आप्तकाः संल्प्तकाः संस्तुतका सप्रेमकाः। एष त्वमुपसंपन्नो वरप्रब्रस्य शासने। यथेमां न विरागयसि दुर्लभं क्षण[संपदम्।][5] प्रासादिकः प्रव्रज्यापरिशुद्धस्योपसंपदः। आख्याताः सत्यनाम्ना वै संबुद्धेन प्रजानता। एष त्व[मुपसंपन्नो][6] प्रमादे संपादय ॥

समाप्तं कर्मवाक्यम्।

[1] Ms. ०वेण, Tib. Žes-daṅ-bcos-daṅ. Cf. Pali sappatissa.

[2] Ms. समय०, Tib Ḥjigs-pa-daṅ-bcas-paḥi.

[3] Ms. ध्वरा, Tib. Brtson-pa.

[4] Ms. गतस्यधि०

[5] Tib. Dal-daṅ-ḥbyod.

[6] Tib. Bsñen-par-rdzogs-zin.

# Index

## Prātimokṣa Sūtra


अकालचीवर ... 25
अचेलिका ... 36
अङ्गुलिप्रतोदन ... 41
अतिरेकचीवर ... 25
अधिकरणशमथ ... 54
अनियत ... 23
अमूढविनय ... 54
आगारशय्या ... 41
आच्छिन्नचीवर ... 25
आपत्ति ... 12
आरण्यकभिक्षु ... 31
आहार्यपादक ... 33
आयुध ... 53
उपानह ... 41
एडकरोमसंस्तर ... 28
कठिन ... 25
कनकमुनि ... 55
कायबन्धन ... 42
कायसंसर्ग ... 16
कुलदूषक ... 20
कुटि ... 17
अस्वामिक ... 17
आत्मोद्देशक ... 17
प्रामाणिक ... 17
कुल्माषपिण्डकनिवासन ... 48
कौकृत्य ... 33, 41, 44
कौशेयसंस्तर ... 28
क्रकुत्सन्द ... 55
खड्ग ... 53
गोचरिका ... 28, 29
गोमय ... 34
गौतम ... 55
चीवरचेतनक ... 26, 27
छत्र ... 53
जातरूपरजत ... 29
जायात्व ... 17
तत्स्वभावेषिय ... 54
तन्तुवाय ... 30
तृणप्रस्तारक ... 54
दण्ड ... 53
धर्मवादी ... 19
नागशीर्षकनिवासन ... 48
निर्वाण ... 54
निषदन ... 29
निषद्याशय्या ... 33
नैसर्गिकपायन्तिकधर्म ... 25
परंपरभोजन ... 35
पर्णसंस्तर ... 33

परिव्राजक … 36
पादुका … 53
पायन्तिकधर्म … 23, 32
पाराजिका … 14, 15, 23
पीठ … 33
पोषध … 12, 44
प्रतिज्ञाकारक … 64
प्रतिदेशनीयधर्म … 46, 47
प्रवारणा … 42
प्रातिमोक्ष 8, 9, 11, 12, 13, 14, 44, 46, 56
भैषज्य … 31
मंच … 33
मनुष्यविग्रह … 14
मातृग्राम 16, 23, 32, 34, 41
मानत्व … 21
मैथुन … 14, 16
यद्भूयेषिय … 54
यान … 53
रत्न … 40
राजमात्र … 14, 27
रूपिक … 29
वर्षांशाटीचीवर … 31
बिंबोपधान … 33
विनयवादी … 19
विपश्यी … 55
विश्वभू … 55
बीजग्रामभूतग्राम … 33
विहार … 17
व्यग्रवादी … 19
संघभेद … 18, 19
संघावशेष … 16, 20, 21
संप्रजानन्मृषावाद … 32
संमुखविनय … 54
सन्निधिकारपरिभोग … 31
साजीव … 14
सुगतवितस्ति 17, 29, 44, 45
सूचीघर … 44
स्मृतिविनय … 54
स्तेय … 14
शाक्यमुनि … 55
शाक्यसिंह … 11
शिखी … 55
शिबिका … 53
शुक्रविसृष्टि … 16
शैक्ष्यधर्म … 48, 53
श्रमण … 39, 40, 54
श्रामणेर … 41
श्रामणेरिका … 41
षट्पंचिका … 32
हस्तिशुण्डकनिवासन … 48
क्षणिका … 17
क्षुद्रानुक्षुद्रशिक्षापद … 33



## Bhikṣukarmavākya

अकिञ्चिन्यायतन … 71
अनागामि … 71
अनागारिक … 59
अन्तरवासक … 61
अर्हत्त्व … 71
आकाशानन्त्यायतन … 71
आचार्य … 60, 72, 73
उत्तरासंग … 61
उपसंपदा 58, 64, 65, 66, 72
उपाध्याय 59, 60, 61, 62, 63, 65, 72, 73
उपासक … 59
कर्मवाचना … 58, 65
काममिथ्याचार … 59
चीवर … 61, 62, 65
ज्ञप्ति 56, 62, 64, 72
ताल 66, 67, 68, 69, 71
तिलतुष … 67
पाराजिक … 63
पूर्वविधि … 59
प्रतीत्यसमुत्पाद … 73
प्रव्रज्या 58, 60, 65, 66, 72
पाणातिपात … 59, 60
बुद्ध … 59, 60, 64
भिक्षुभाव … 58, 65, 66
मातृग्राम … 67, 72
मृषावाद … 60
शाक्यमुनि … 60
शाक्यसिंह … 60
शिक्षापद … 73
शून्यता … 71
संघाटी … 61
सकृदागामि … 71
सम्यक्संबुद्ध 60, 66, 68, 69, 72
स्रोतापत्ति … 71
विज्ञानानन्त्यायतन … 71
विमोक्ष … 71